३ कृशांगः तनूनपात् जाठरस्य पावकः शरीरं धायतीति तनूनपादग्निरिति स्वामी· नपादिति नञ्प्राण्णनपादित्यादिसूत्रेण निपातनान्नलोपाभावः· आधिजैः

दुःखोत्थैर्बाष्पैर्निश्वासोष्मभिर्वा बाष्पो नेत्रजलोष्मणोरित्यमरः· पुंस्याधिर्मानसी व्यथेति विश्वामरौ· द्विगुणाकारा कृतिर्यस्य सः द्विगुणः ततः कृभ्वि

द्विगुणीकृतं द्विगुणितं तंगुणस्यान्नित्तस्यादिति कौमुदी· जिनेन्द्रिया मृत्युवनं विसृजन्निवेत्यर्थः· धूमवितानं धूमसमूहं बभार अधिरपि तत्रासीत्

मि:२

राम:

१८

परस्येति। किंच इद्धं दीप्तं तं नमित्यर्थः। ञिइन्धी दीप्तौ कर्त्तरि क्तः। तं राजानमाराधयितुं सेवितुं परस्य शत्रोः मर्माणि हृदयादिजी
वस्थानानि कुलाचारागुणानि च विध्यन्ति भिन्दन्तीति मर्माविधस्तै रत्राणगहनेति पावत्। व्यधेः क्विप्। ग्रहिज्येत्यादिना संप्रसार
णं। नहिवृतीत्यादिना पूर्वस्य दीर्घः। तं मर्माविधं निजं स्वीयं द्विजिह्वतां सर्पत्वं यो दोषो दृष्टिविषयत्वाद्वीविषयत्वादिस्तं अ
न्यत्र द्विजिह्वतापिशुनता। द्विजिह्वौ सर्पसूचकौ इत्यमरः। सैव दोषस्तमुज्झतां त्यजतां फणिनां सर्वं धर्मिभिः अजिह्मगामिभिः करच
रणादिस्मात्। विग्रहधारिणां ऋजुगतिभिः अकपटचारिभिश्च। तथा कर्णाभ्यां सह वर्त्तन्त इति सकर्णास्तैश्च श्रुत्या व

परस्य मर्माविधमुज्झतां निजं द्विजिह्वतादोषमजिह्मगामिभिः। तमिद्धमाराधयितुं सक
र्णकैः कुलैर्न भेजे फणिनां भुजंगता ॥६२॥ राधादामोदराभ्यां नमः कृष्णाय नमः

त्वं विहायाः विश्रुतः कर्णौ इत्यर्थः। तेन सहेति तुल्ययोगे बहुव्रीहिः। शेषाद्विभाषेति कप्रत्ययः। अन्यत्र कर्णयति
सर्वं शृणोतीति सकर्णकः कर्णयतेर्बुल्। ततः पूर्ववत्समासे सकर्णकैः सनियामकैरित्यर्थः। कुलैर्वर्गैर्भुजंगा
नां सर्पता विटत्वं च। भुजंगो विटसर्पयोरिति हलायुधः। न भेजे तत्स्वभुजंगमः। गमेस्सुपि ख्वाडिच्चनस्मिन्नियत्नात् खलैः
खलत्वमपि सर्पैः सर्पत्वमपि विहायैव सभायां क्रियाभिः सौम्यत्वं श्रियत इत्यर्थः। अत्र वस्तुनः सर्वविशेषणसाम्यात्प्रस्तुतस्य
लसमवधारमतीतेः समासोक्तिः ॥६३॥

मा·टी·प्र·
१९

नदीयेति· नदीयमातंगानां घटाभिर्वृहैर्विघट्टितैरभिहतैः करिणां घटनाघटेस्समूहः अतस्तत्कटस्थलप्रोषितामपगतानि दानवा
रीणि येषां तैर्गृहीताः अपलाप्य संश्रिता दिशो येस्ते· गृहीतदिक्कैः· शेषाद्विभाषेति कप् अपुनर्निर्वान्तैर्भिर्याप्तमेव स्थितानिर्दिग्गजेभ्य
रा यथार्थ्यं दिक्षु स्थिता गजा दिग्गजा इत्यन्वर्थनाम फलं अलंभि लभेर्लभेश्चेति नाकर्मणि लुङः विभाषा चिण्णमुलोरिति
विकल्पान्नुमागमः॥६४॥ अभीक्ष्णमिति· सहोष्मणा सोष्मस्तस्य ज्वरितस्येतिसोष्मणस्तस्य तथा तस्य वपुरभीक्ष्णं भृशमुष्णैरपि शी

नदीयमातंगघटाविघट्टितैः कटस्थलप्रोषितदानवारिभिः॥ गृहीतदिक्कैरपुनर्निवर्तिभिश्चिरा
य याथार्थ्यमलंभि दिग्गजैः॥६४॥ अभीक्ष्णमुष्णैरपि तस्य सोष्मणः सुरेन्द्रबन्दीश्वसिता
निलैर्यथा॥ सचंदनाम्भःकणकोमलैस्तथा वपुर्जलार्द्रापवनैर्न निर्ववौ॥६५॥ ६२॥ ६२

कादिमाः सुरेन्द्रस्य बंद्यः बंदीकृताः स्त्रियस्तासां श्वसितानिलैर्निश्वाससमीरणैर्यथा निर्ववौ न निर्वाणं निर्वृतो मोक्ष
इति वैजयन्ती· तथा सचंदनाम्भःकणाः चंदनबिंदुसहिताम्बुकणास्तैः कोमलाः मृदुलाश्च तैर्जलार्द्राणां जलोक्षितानां ता
लवृन्तानां पवनैर्न निर्ववौ धवित्रं तालवृन्तं स्यादुत्क्षेपव्यजनं च तत्· जलार्द्रास्याज्जलेनार्द्रमिति च अत्र सन्तप्त
स्योपचारात्निवृत्तिरिति कारणविरुद्धकार्योत्पत्तिरूपो विषमालंकारः॥६५॥ ६२ ॥ ६२ ॥ ६२ ॥६० रामः
१९

न येनेति सदा नित्यं न तु यथाकालं प्रसूनकॢप्तिं पुष्पसंहतिं दधतो धारयन्तः [illegible] नयः वर्षा प्रावृट् तत्र पी [illegible] उष्णउष्णागमस्तपः
श्रियं प्रावृट् श्रियं भूमि वर्षा अथ शरत् श्रियं यामित्यमरः तथा हिमागमो हेमन्तः शरदा तथा शिशिरो वसन्तलक्ष्म्या च समेत्य मिथु
नीभावेन मिलित्वा अस्य रावणस्य पुरे स्थ संतो निवासं कुर्वन्तः एव सेवां चक्रुरिति शेषः तेन निकृतरिति वस्तुमुत्प्रेक्षते यथा कुटुम्बि
नश्च ते वा वपुः समेत्य यथपुरि निसमुदाय सममुक्षिपनो रभेद विवक्षया समानकर्तृत्वम् त्र पुरे तु गपत्सर्वेषु सर्वधर्मिणामादसर्वधर्मा
पाति शयोक्तिः ॥ ६६ ॥ स चापमा समविवनाशलुप्यमपि द्रष्टव्यानस्तु पेपनयतनइति पुष्पे नाह अमानवमिति मनोऽयं मानवः तस्येद
मित्यण् अस्य ये पर्यवसानाज्ज्ञानवैकृतवचनं अन्यथा मनोज्ञातविसेवस्यात् अप्यानवं मानुषं नजायते इत्यजं अन्येष्वपि दृश्यते

न येन वर्षा शरदौ हिमागमो वसन्तलक्ष्म्यौ शिशिरः समेत्य वै ॥ प्रसूनकॢप्तिं दधतः सदर्तवः पुरे स्म वास्तव्यकुटुम्बि
नो यथा ॥ ६६ ॥ अमानवं ज्ञानमजं कुलेऽमलो प्रभाविनं भाविनमंतमात्मनः ॥ मुमोच जानन्नपि जानकीं न यः सदा
भिमानैकधना हि मानिनः ॥ ६७ ॥ ९९ ९९ राधादामोदराभ्यां नमः ॥ परमात्मने नमः ॥ कृष्णायनमः ॥ ❁ ॥ ६१

इति [illegible] असमः तथापि मनो कुले जाजं रामरूपेणोत्पन्ने इति विरोधः स चाभासत्वादलंकार इत्याह प्रभाविनमिति महानुभा
वे तस्मिन्न कश्चिद्विरोध इति भावः अभीक्ष्णो शिनिरिति निशिर्वा मत्वर्थीयः भवन्तमिति शेषः आत्मनः स्वस्यान्तयति अन्तं करो
तीति तं अन्तं अन्तं मृत्युं करोतेर्ण्यन्तात्पचाद्यच् भाविनं भविष्यन्तं भविष्यतिगम्यादयः जानन्नपि सोऽयं रामो जनकस्यापत्यं स्त्री जा
नकी तां सीतां न मुमोच अन्तमिस्तु न रथ्लो केनान्वयः जानतो पि मोचने मानितत्कारणमाह मानिनः सदा प्राणात्ययेपि अभि
मानस्वरूपकं मुख्यं धनं येषां ते प्राणात्ययेपि मानं न त्यजन्ति अर्थकारणे न कार्य समर्थनरूपोऽर्थान्तरन्यासः ॥ ६७ ॥ ६१ ६१

स्मरतीति· स्मरतीति भवान् भातेर्डवतुः दशरथस्यापत्यं पुमान् दाशरथिः अत इञ् भवन्नामः सन्नित्यर्थः भवतेर्लटः शतृ प्रत्ययः वनांताद्
उकारस्याद्वनितापहारिणं सीतापहर्त्तारं अमुं रावणं आविद्धानि सेतुबंधे द्रुमैरभिहतानि अतएव चलंति जलानि तैराविलंस अत
एव आविलं च तं पयोनिधिं विलंघ्य लंकां निकषा लंकासमीपे समयानिकषाशब्दौ सामीप्यलक्ष्ये मतावितिहलायुधः अभि
तःपरितःसमयानिकषाहाप्रतियोगेष्वपि इत्युपसंख्यानात् द्वितीया· हनिष्यत्यवधीत्· अभिज्ञावचने लृट् इति भूते लृट् अस्मिन्नर्थे भ
वान्स्मरतीति काकुः ममाभिजानासि किमित्यर्थः दोषे प्रमा॥ ६८ ॥ अथेति· राक्षसदेहत्यागानंतरं संप्रति छलनापरः परप्रतारणा
परः स्फुरावलः शैलूषो नटः भूमिकां रूपांतरमिव शैलूषो नटभिद्वचसोः भूमिका रचनायामस्यां मूर्त्यंतरपरिग्रहइति विश्वः अपरा॥

स्मरत्यदो दाशरथिर्भवन्भवानमुं वनान्ताद्वनितापहारिणम्॥ पयोधिमाविद्धचलज्जलाविलं विलंघ्य लंकां
निकषा हनिष्यति॥ ६८ ॥ अथोपपत्तिं छलनापरोऽपरामवाप्य शैलूष इवैष भूमिकाम्॥ तिरोहिता॰
त्मा शिशुपालसंज्ञया प्रतीयते संप्रति सोऽप्यसः परैः॥ ६९॥ छ ॥ ॥ एम· शिव ॥ १ ॥१

५४ मुपपत्तिं भवांतरमित्यर्थः अवाप्य शिशुपालसंज्ञया तिरोहितात्मा तिरोहितरूपः सः सोऽपि रावणएव सन्नपि परैरितरैः स
भवतीत्यसः नस्मादुत्प्रेक्ष नञि नित्यसमासः एतत्तदोः सुलोपोकोरनञ्समासे हलि इत्यत्र तस्मान्नञि सुलोपाभावः प्रतीयते
ज्ञायते प्रतिपूर्वादिणः कर्मणि लट्· यथैकः शैलूषो नानारूपं समास्थाय तत्तद्वेषभावादिभिः स्वं गूहते स्वभावं तिरोहितं तद्वयम
पि मानुषदेहपरिग्रहादन्यस्वभावोऽपि दोर्जन्यं तु न देवेष्वयं संहार्य इति भावः॥ ६९ ॥ रामचंद्राय नमः ६९ ॥

अथैतद्दौर्जन्यं त्रिभिराविष्करोति । स बाल इति । शिशुपालो बालः सन्वपुषा चतुर्भुजः भुजचतुष्टयवान् आसीत् द्विभुरिति यथ्य
नि: तथा मुखेन पूर्णेन्दुनिभः तनुत्वे त्रिलोचनो लोचनत्रययुक्त आसीत् अंबके चेति ध्वनिः बालविशेषणात्वं प्रति न तत्सर्वमंत
र्हितमिति भावः संप्रति युवा सन्करेण बलिना आक्रान्तमाह ॰ ॰ राजकः सन् अन्यत्रांशुभ्यामप्रशैलः बलिहस्तांशवः क
राइत्यमरः तेजसा रविः असंशयं संशयो नास्तीत्यर्थः अर्थाभावेऽव्ययीभावः वपुषा मुखेनेति येन त्वं प्रयोगविकार इति तृतीया
हानिवद्वाधिक्यस्यापि विकारत्वात् यथाह वामनः हानिवदाधिक्यमप्यंगानां विकार इति तेजसेति प्रकृत्यादिभ्य उपसंख्यानेन तृती ॰

संबाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः॥ युवा कराक्रान्तमहीभृदुच्चकैरसंशयं संप्रति
तेजसा रविः॥७०॥ स्वयं विधाता सुरदैत्यरक्षसामनुग्रहावग्रहयोर्यदृच्छया॥ दशाननादीनभि
राद्धदेवतावितीर्णवीर्यातिशयान्हसत्यसौ॥७१॥ छ ॥ ॥ नारायणं नौमि॥ छ ॥

यथाक्रान्तेत्यादिश्लेषानुप्राणितो व्यक्षारविरसंशयाश्चिति तस्य पूर्णेन्दुनिभ इत्युपमया संसृष्टिः हरिहरादिमहिम उत्प
त्वादतिशयातिदुर्वृत्तो भावः॥७०॥ स्वयमिति यदृच्छया स्वेच्छया स्वयं स्वसामर्थ्येन न तु देवताप्रसादबलादित्यर्थः सु
रदैत्यरक्षसां देवदानवयातुधानानां अनुग्रहावग्रहयोः अनुग्रहनिग्रहयोः विधाता कर्ता असौ शिशुपालः अभिराद्धाभिरा
राधिताभिर्देवताभिर्वितीर्णः दत्तो वीर्यातिशयः प्रभावातिशयो येषां तान् दशाननादीन् हसति अनन्यप्र
सादलब्धैश्वर्यकथं पावकोल्कल्पतेजो गर्वायुसतीत्यर्थः॥७१॥ छ ॥ ॥ = ॥ ॥ ॥ छ ॥

बलेति· जिगीषुणा निसोत्साहवतेत्यर्थः· तेन शिशुपालेन बलावलेपाद्बलगर्वादधुनापि पूर्ववत्पूर्वजन्मनीव जगत्प्रबाध्यते न
थाहि· सती पतिव्रता योषित्स्त्री प्रकृतिः स्वभावश्च निश्चला अतिस्थिरा प्रकृतिः भवान्तरेष्वपि जन्मान्तरेष्वपि पुमांसमभ्येति यातीति जानाति चर
तिमनोवाक्कायकर्मभिः सा भर्तृलोकमाप्नोति सद्भिः साध्वीति सोच्यते मनुः· उपमेयोपमेयं स्फुटरस्फूर्तोऽर्थान्तरन्यासः॥७२॥
तदेनमिति· तत्तस्माद्धेतोर्विधातुर्ब्रह्मण उल्लंघितशासनं स्वयं विधातेत्याधुक्तरीत्या अतिक्रान्तदैवाज्ञमित्यर्थः· सापेक्षत्वेऽपि गम
कत्वात्समासः। एनं शिशुपालं कीनाशनिकेतनस्य कृतान्तसदनस्यातिथिं विधेहि मारयेत्यर्थः· कीनाशः कर्षके क्षुद्रे कृ

बलावलेपादधुनापि पूर्ववत्प्रबाध्यते तेन जगज्जिगीषुणा॥ सती च योषित्प्रकृतिश्च निश्चला पुमांसम
भ्येति भवान्तरेष्वपि॥७२॥ तदेनमुल्लंघितशासनं विधेर्विधेहि कीनाशनिकेतनातिथिम्॥ शुभे
तराचारविपक्त्रिमापदो निपातनीया हि सतामसाधवः॥७३॥ छ ॥ ॥ छ ॥ ७६९ ॥

तान्ते पांशुघातिनोऽस्तीति विश्वः· न चैतत्साधुगर्हितं हस्तेन सर्पमारणं भवादृशामवद्यकर्तव्यत्वादित्याह· शुभेतरा
चारेण दुराचारेण विपक्त्रिमाः परिपाकेन निर्वृत्ताः कालपरिपाकेन प्राप्ता आपदो येषां ते तथोक्ताः· ड्वितः क्त्रिरिति
पचेः क्त्रिप्रत्ययः· क्त्रेर्मम्नित्यमिति मप्प्रत्ययः· असाधवो दुष्टाः सतां भवादृशां जगन्नियन्तॄणां निपातनीया हन्तव्याः
हि न वने दुःखदोषः स्वदोषेणैव तेषां विनाशोऽस्ति न मागत्वादस्माकमित्याशयेन शुभेतराचारेत्यादि विशेषणम्

[illegible] ॥ ७३॥ [illegible]

गां२

किंच एवंदृष्टनि मद्देशि विभानुग्रहः स्यादिसाह हृदयमिति अरिवधोदयादि पुनाम्रालाभात् उ दूढदुष्टिमनोध्वि
साद्दत दार्ढ्यं स्वस्थामिति यावत् पृथ्वादिलाद् ठशाब्दादिमनिच्प्रत्ययः र ऋतोहलादेर्लघोरिति ऋकारस्य रेफो
देशः पुनः शत्रुपुरं दारयतीति पुरंदरः इन्द्रः पूः सर्वयोर्दारिसहोरिति खच्प्रत्ययः खचिहूस्वः इत्युपधाहूस्वः वाचं
यमपुरंदरौ चेतिनि पातनान्मुमागमश्च तस्य हृदयं पुनर्भूयो वि पूर्ववदिति भावः घनपुलकयोः सांद्ररोमांच

हृदयमरिवधोदयादुदूढदुष्टिमद्धातु पुनः पुरन्दरस्य घनपुलकपुलोमजाकुचाग्र द्रुत
परिरम्भनिपीडनक्षमत्वम् ७४ रामायनमः ॥ राधादामोदराभ्यां नमः ॥ ७ ॥ ७

योः पुलोम्नो जाता पुलोमजा शची तस्याः कुचाग्रयोः द्रुतपरिरम्भः शीघ्रकाङ्क्षिताऽऽलिंगनं तत्रयन्निपी
डनं तस्य क्षमत्वं महत्वं दधातु शाकविनविक्षेपात्यक्तभोगेन शाङ्केरासं अनिलसंदानि ष्कंठकं स्वकंराज्यं
भुञ्जता मितल्पर्थः अत्र दार्ढ्यार्थस्यो दूढदुष्टिमान्निविशेषणागत्या निपीडनक्षमत्वप्राप्ति हेतुतो क्त्यापदार्थहेतुक
काव्यलिंगं हृदयनिपीडनक्षमत्वसंबंधेप्य संबंधोक्त्या संबंधेऽसंबंधातिशयोक्तिरित्यर्थालंकारोऽक्तसन्त्राग्राश्च

[illegible]

ओमिति। तस्मिन्सुरमुनौ नारदे इतीत्थं वाचं व्याहृत्योक्त्वा नभ उत्पतिते स्वस्थानं गते इन्दोः श्रियं बिभ्रति अथ शार्ङ्गिणो वा
क्यानन्तरमोमित्युक्तवतस्तथास्त्वित्यङ्गीकृतवतः कृष्णस्याङ्गीकृतो रोषवृत्ति[...]ः चिदीनां जनपदानां राजा चैद्यः शिशु
पाल॰ तं प्रति क्रोधस्तोत्रादाख्यं अङ्गुलस्य मः तं प्रति क्रुद्धस्य शार्ङ्गिणो वदने व्योम्नीवास्ये अनिशं सर्वदाऽव्यभिचारेणेत्यर्थः
शत्रूणां विनाशस्य पिशुनः सूचकः चन्द्रः उत्थितः केतुः क्षितौ शत्रूणां विनाशं कथयति शास्त्रादिति भावः। केतुरुत्पातविशेषः
केतुर्ध्वजोपताकायां महोत्पातादिलक्ष्मसु इत्यमरः। भ्रुकुटिच्छलेन भ्रूभङ्गव्याजेनास्पदं प्रतिष्ठां स्थितिं चकार। आस्पदं प्रतिष्ठा

के॰ १ ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचं नभस्तस्मिन्नुत्पतिते पुरः सुरमुनाविन्दोः श्रियं बिभ्रति ॥
शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चैद्यं प्रति व्योम्नीव भ्रुकुटिच्छलेन वदने केतुश्चकारास्पदम् ॥ ७५ ॥

यामिति। निपातनात्स्तुतः आगमः। अनेन वाक्यार्थीभूतवीररससहकारिणो रौद्रस्य स्थायी क्रोधः स्वानुभवेन भ्रुकुट्याका
रेणाभूतोऽनुमेय इत्युक्तं। तथा तद्विनाशभूतस्यांगीनो वीररसस्यापि स्थापिश यत्नो परनीयक उत्साहेऽस्तुपपन्न
एवेत्यनुसंधेयं। इन्दोः श्रियं बिभ्रतीत्यत्र मुनेरिन्दुश्रियो गानन्तसंबन्धी मितिसादृश्याक्षेपाद्धसंभववस्तुसंबन्ध
रूपो निदर्शनालंकारः। वदने व्योम्नीवेत्युपमा। भ्रुकुटिच्छलेन केतुरिति च्छलादिशब्देनासत्यवस्तुप्रतिपादन
रूपोऽपह्नवः। न तु विनाशन सूचकेऽत्यपेक्षा इति सान्निध्ये व्योमावस्थानसम्पादकत्वेन निदर्शनोपमयोरस्य रामः

मा·टी·प्र·
२२

हृद्योपकारकत्वादंगांगिभावेन संकरः चमत्कारितया मंगलाचरणरूपकत्वासमगान्यश्लोकेषु श्रीशब्दप्रयोगः
यथाह भगवान्भाष्यकारः मंगलादीनि मंगलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रकथ्यन्ते वीरपुरुषाणि आयु
ष्मत्पुरुषाणि च भवन्ति अध्येतारश्च वक्तारो भवन्ति शार्दूलविक्रीडितं वृत्तं सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूल
विक्रीडितमिति लक्षणात् सर्गान्ते वृत्तभेदः यथा दण्डी सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसंधिभिः सर्वत्र भिन्नवृत्तैः स

इति शिशुपालवधे महाकाव्ये माघकृतौ श्र्यंके नारदाभिगमनो नाम प्रथमः
सर्गः॥ ॥ नारायणाय नमः॥ लेखकपाठकयोः शुभमस्तु॥ १

गीतैरुपेतं लोकरंजकमिति॥ ७५ ॥ अत्र कविः काव्यवर्णनमाख्यानपूर्वकं सर्गसमाप्तिकं कथयति इतीति
इतिशब्दः परिसमाप्तौ माघकृतावितिकविनामकथनं महाकाव्य इति महत्कृत्येन लक्षणसम्पत्तिः सूचिताः शिशु
पालवध इति काव्यव्यवस्थाकथनं प्रथमः सर्गः समाप्त इति शेषः एवमुत्तरत्रापि द्रष्टव्यं॥ ॥ इति श्रीपदवा
क्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वंकषाख्ये प्र

प्रथमः सर्गः समाप्तः॥ १ ॥

रामः
२२

५८
नवसर्गा:

माघप्रथमःसर्गःपत्राङ्का ७२
समाप्तोयंप्रथमःसर्गः ७२

द्वितीयस्सर्गाःगारंभः॥ पत्रसंख्या· ३१
२

मा·टी·द्वि· श्रीगणेशायनमः॥ ॥अत्रास्मिन्सर्गे मंत्रवर्णनायबीजम् वपति· यियक्षमाणेनेति· अथेत्यनुसंदेशाध्यवणानं
१ तरं यियक्षमाणेन यष्टुमिच्छता यजतेः सन्नंताल्लटः शानजादेशः पार्थेन पृथापुत्रेण युधिष्ठिरेण· तस्येदमित्यण्· अ
न्यथा स्त्रीभ्योढक् आहूतः आकारितः हुयतेः कर्मणि क्तः· संप्रसारणदीर्घौ तथा· अभिचैद्यं शिशुपालंप्रति· लक्षणेना
भिप्रती आभिमुख्ये इत्यव्ययीभावः· अभिरभागे इति कर्मप्रवचनीयत्वे तद्योगे द्वितीया वा· प्रतिष्ठासुः प्रतिष्ठातुमिच्छुः

यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम्॥
अभिचैद्यं प्रतिष्ठासुरासीत्कार्यद्वयाकुलः॥१॥

तिष्ठतेः सन्नंतादुप्रत्ययः· मुरं द्विषन्मुरारिः द्विषोमित्र इति शतृप्रत्ययेन लोके स[?]द्विषः शत्रुर्वा यद्विनमतिविवेक
त्यिकः षष्ठीप्रतिषेधः कार्यद्वयेन सुहृत्कार्यगुरुकार्यरूपेणाकुलो विप्रतिषेधादावश्यकत्वाच्च द्वयोः संदेहा
न् आसीत् अतो मंत्रस्यायमवसर इति भावः॥१॥ बालकृष्णाय नोमि· राधादामोदराभ्यां नमः॥ ७ रामः
१

एवंमंत्रबीजसंदेहमुपन्यस्यमंत्रोविनिर्देशागमनमाह गुरुकाव्येति · अथसंदेहानन्तरंअसौहरिरभिनभःआकाशेप्रति
पूर्ववदव्ययीभावः कर्मप्रवचनीयत्वेद्वितीयावा · गुरुकाव्योवृहस्पतिशुक्रौ अनुगावनुयायिनौयस्यांतांगीष्पतिधि
षणोगुरुः शुक्रोदैत्यगुरुःकाव्यइत्यमरो · चंद्रस्येमांचांद्रींश्रियंविभ्रत् अत्रश्रीतुल्यांश्रियमितिनिर्देशानादर्भेदः उ
द्धवसीरिभ्यांसहउद्धवरामाभ्यांसार्द्धंसदःसभांसमासदत् अगमत् राजसदसःप्रासादत्वादितिभावः सदेर्लुङि पुषा
दित्वात्च्लेरङादेशः अगमत् · गिरिपृष्ठंसमारुह्यप्रासादेचारुहेगतः आरोप्येति शलाकेयामंत्रयेद्भावभाविनम् ॥१॥

गुरुकाव्यानुगांबिभ्रच्चांद्रीमभिनभःश्रियम् ॥ सार्द्धंमुद्धवसीरिभ्यामथासावासदत्सदः ॥२॥
जाज्वल्यमानाजगतःशान्तयेसमुपेयुषी ॥ व्यद्योतिष्टसभावेद्यामसौनरशिखित्रयी ॥३॥

संख्यायाञ्चपर्वे हि नप
जाज्वल्यमानेति · जगतःशान्तये अनुपद्रवायसमुपेयुषी मिलिता जाज्वल्यमाना भृशंज्वलंती · धातोरेकाचोह
लादेःक्रियासमभिहारेयङ् अनीलटः शानजादेशः टाप् असौनराः पुरुषाः त्वग्नि[illegible] त्रयी द्विगुः [illegible]
स्यायजादेशौ टिड्ढाणञित्यादिनाङीप् सभायांआस्थानीमेववेदिः वेदिःपरिष्कृताभूमिरित्यमरः तस्यांसभावेद्यां
व्यद्योतिष्ट दीप्यतेस्म द्युतदीप्तौ लुङि नित्यं रूपकालंकारः ॥ ३॥ रामचंद्रायनमः गुरुचरणकमलेभ्योनमः ॥ ३॥ ६४ ॥

रिवः

मा·धे·टी
२

स्तेोति· रत्नानां स्तंभा इति षष्ठीसमासः· विशेषपर्यवसानात्विकारार्थत्वं तेषु संक्रांतं प्रतिमासं क्रांतप्रतिबिंबाः प्रतिमानं
प्रतिबिंबप्रतिमेत्यमरः· तेत्र पत एकाकिनो सहायाअपि· एकादाकिनिश्चासहाये इत्याकानिःश्रयसय· परितोऽभितः सर्व
तः पर्यभिभ्यां चेति तसिःप्रत्ययः· सर्वसर्वोभयार्थवर्तमानस्माभिष्यते· पौरुषेयेण प्रतिबिंबभूयस्त्वात्पुरुषसमूहेन वृता
इवेत्युत्प्रेक्षा वकाशिरे पुरुषाद्वधबंधविकारसमूहतेनकृतेष्विति वक्तव्यमिति ढञ्प्रत्ययः· एतेनाविजनत्वमुक्तं· य
द्यपि निर्जने निर्गवाक्षे च निर्भित्तिं न स्थेयं श्रियै प्रासादाग्रे तल रोपयाम संत्रयेद्भावभाविनामिति कामंदकीये मंत्रभूमेः

रत्नस्तंभेषु संक्रान्तप्रतिमास्ते वकाशिरे॥ एकाकिनोपि परितः पौरुषेयवृताइव॥ ५ ॥ अध्या
सामासुरुत्तुंगहेमपीठानि यान्यमी॥ तेषु केसरिक्रान्तत्रिकूटशिखरोपमा॥ ६ ॥राम ७

स्तम्भा आवर्यनिषेधोह स्थले· तथापि तस्यापि विजनलोपलक्षणात्वात् अदोष इति भावः॥ ५॥ अध्यासामि
ति· अमीत्व्रयो यान्युत्तुंगान्युपिहेमपीठानि आसनानि अध्यासामासुः अधितस्थुः येभूपेरस्य· आधिशीङ्स्थासां
कर्मेति कर्मत्वं· आसउपवेशने लिट् दयायासश्चेत्साम्प्रत्ययः· कृञ्चानुप्रयुज्यते लिटीत्यस्तेरनुप्रयोगः· आम्प्रत्ययवत्कृञोनु
प्रयोगस्येति तङ्· एवं तानि पूर्वाद्रष्टोनां तत्तेषु पद्मस्ते· पीठेः केसरिभिः सिंहैः क्रान्तानां त्रिकूटस्य त्रिकूटाद्रेः शिखराणामुप
मासादृश्यं· ऊढे ऊंवः कर्मणिलिट्स समस्तारणं· नीत्रिकूटान्तस्य सेन्वर्थसंज्ञा· कूटोऽस्त्री शिखरं शृंगमित्यमरः उप

राम: २

उत्तरस्येति॰ अर्थोपवेशनानन्तरं विचष्टे इति विचक्षणो वक्ता॰ कर्त्तरि क्तु इति न्यासकारः अनयोश्च प्रतिषेधो वक्त
व्यम् इति वक्षि॰ ख्यान् इति ख्याञादेशाभावः हरिर्गुर्वोरुद्धवगमयोः पितृव्यज्येष्ठभ्रात्रोर्ईयायतद्भ्यां गमयामि इत्यर्थः उत्तरयोर्मनोहरतोरु
भयोः कार्ययोः पूर्वोक्तयोस्तं विप्रतिषेधं विरोधमाचचक्षे॰ आख्यातवान्॰ तुल्यबलविरोधो विप्रतिषेधः ८ द्वितीयान्तेति॰ कुन्दं माघ्यभ
वःपुष्पविशेषः माघ्यं कुन्दमित्यमरः॰ कुन्दकुड्मलाग्राणीव दन्ता यस्य कुन्दकुड्मलाग्रदन्तः॰ अग्रानन्ते रुद्रोऽश्रवभवराहे स्यष्टौ त अ

उत्तरस्यायमुत्तरयोरुभयोरर्थकार्ययोः हरिर्विप्रतिषेधं नाम चचक्षे विचक्षणाः ८ द्वि
तीयान्तैः समासैः कुन्दकुड्मलाग्रदन्तः श्रितैः सम्पन्नैर्वा भवन्ति स्युः पंचसुद्धवर्णा सरस्वती ९

ग्रांते सर्वपदवतुरीहिः समासान्तो वैभाषिकी इत्यादेशः तस्य हरेः सरस्वती अंतः प्रधानासभांतः सभाभ्यंतरमित्यर्थः
साद्यामतिनामकाश्रिता येस्तैः श्रितैः सम्पन्नैर्वा स्याल्लिंते वरमात्रे गर्पनात् क्तः अर्त्तिश्रित्या इति ना पुनरागमः श्रितौ स्युर्वुः ५ उद्धवर्णाः स्फु
टाक्षरा स्वच्छकान्तिः श्यामवत् स्वाभाविकावर्णपिण्डेषु नानहेतुत्व शुभ्रक्षनो समतसर्वाभिभाषी हरिरितिभावः ९ ॥ ॥ स २

सा·टी·हि·
३

कार्यविप्रतिषेधं निवेद्य ततः स्वप्रश्नभावे दर्पयिष्यन्नप्यं इति तमानितं नावसारितानि · भवद्भिरिति · भवद्भिर्यां युष्माभिर्वाचां अवसरप्रदाना
य प्रसंजनायेत्यर्थः · नोस्माकं वचांसि सिद्धानो क्षापनार्थमुच्यते ननु सिद्धांतं नेत्यर्थः · तथा हि · पूर्वं रज्यते अस्मिन्निति पूर्वरंगो नाट्यशा
लानत्स्थं कर्मापि पूर्वरंग इति दशरूपके · अतः अथ पूर्वरंग इति रंगप्राधानारभ्यारंभे विघ्नशान्तिकारो यान्नान्दीपाठगीत
वादित्राद्यनेकांगशोभेनाद्यादौ कर्तव्यः कर्मविशेषः · नाटकं वसन्तराजीये यन्नाट्यवस्तुनः पूर्वं रंगो विघ्नोपशान्तये · कु
शीलवाः प्रकुर्वन्ति पूर्वरंगः स कीर्तितः इति स पूर्वरंगः नाटके भवं नाटकीयं तत्र वस्तुनो मिश्रेत्यर्थः · प्रसंगाद्ध · तस्यायनेतीयादेशः

भवद्भिर्यामवसरप्रदानायवचांसि नः ॥
पूर्वरंगः प्रसंगाय नाटकीयस्य वस्तुनः ॥ ८ ॥

तस्य वस्तुन इतिवृत्तस्य प्रसंगाय प्रसंजनाय प्रसर्जनायेति यावत् · अतः प्रथमवादो न दोषायेति भावः · पूर्वरंगः प्रस्तावने
ति रंगराडः तस्मिंश्च पूर्वरंगं विधायैव सूत्रधारे विनिर्गते · प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः · प्रथमं पूर्वरंगश्च ततः
प्रस्तावनेति च · आरंभे सर्वनाट्यानामेतत्सामान्यमिष्यते इति दशरूपकारमतेऽविरोधादिति · अथ हि वाक्य पूर्वरंगयोः
प्रसंजनकत्वस्य रूपसामान्यस्य वास्तुरूपेश्वराद्वान्तरेण पृथक् निर्देशादिति रूपमालंकारः लक्षणानुक्रमेण ॥ ॥ ६०

राम:
३

संगतिस्वमतमाह॰ करदीकृतेनेति॰ दिशंजित्वरीः जयनशीलाः इत्वरनसजिसर्त्तिभ्यः क्वरप् ॰ऊद्योगात्कर्मणिषष्ठी॰ भ्रातृभिर्भीमा
दिभिर्हेतुभिः करदाः षष्ठभागप्रदाः भागधेयो बलिः करइत्यमरः नन्तःश्वि॰ ऊर्यादिच्विडाचश्चेति गतिसंज्ञायां कुगतिप्रादय
इति नित्यसमासः अकरदाः संपद्यमानाः कृताः करदीकृताः भूपालाः येनसतथोक्तो वशीकृतराजमंडलइत्यर्थः अभूततद्भावे
संपद्यमानेकर्त्तरिच्विः तपसः सुतो धर्मपुत्रः तपश्चांद्रायणादौस्याद्धर्मलोकान्तरेपिचेतिविश्वः अस्मद्विनापि अस्माभिर्वि

करदीकृतभूपालो भ्रातृभिर्जित्वरीर्दिशः ॥
विनाप्यस्मदलंभूष्णुरिज्यायै तपसः सुतः ॥ २ ॥

नापीत्यर्थः पृथग्विनेत्यादिना तृतीयाविकल्पात्पक्षे पंचमी॰ इज्यायै यागाय यज्ञ यजनौ भावे क्यप् वचिस्वपीत्यादिना संप्रसा
रणम् नमः स्वस्तीत्यादिना चतुर्थी॰ अलं समर्थो भूष्णुर्भवनशीलः भूष्णुर्भविष्णुर्भवितेत्यमरः ग्लाजिस्थश्च ग्स्नुरिति च
सु १ कारात् भुवः ग्स्नुप्रत्ययः गित्वात् गुणाभावः अतो जेत्रपार्श्वेव कार्यानयज्ञपात्रेतिभावः ॥ २ ॥ ॥ ९ ॥ रामाय नमः ॥ छ

मा॰टी॰टि॰
४

ननु पद्मालेर्जेन्रयाग्रापांप्रभयानुसरणांस्यान्तगाह उत्तिष्ठमान इति उत्तिष्ठमानो वर्द्धमानः उदोनूर्ध्वकर्मणीत्यात्मनेपदं परः श
त्रुस्तु यथोपनयनं पथ्यं हितमारोग्यं चेच्छतां पुंसेति शेषः नोपेक्ष्यो नोदासिन्येन द्रष्टव्यः कुतः हि यस्मात्तस्मिन्नोवद्धिष्यमाणौ न
दःसहेति सहादेशे रदाभ्यांस्य समनोरिति विभाषा परस्मैपदं न रदाभ्यां ऋतुर्भ्यश्चेति इड्भावः आमयो व्याधिः रोगव्याधिगदामया
इत्यमरः सशत्रुश्च शिष्टैः नीतिज्ञैः समौ तुल्यरूपौ आम्नातौ व्याख्यातौ अल्पीयसो प्युपेक्षि महानर्थाय रोगवत् अतस्त्याज्य
पेक्ष्यत्वाद्रूभयानुवृत्तिः कर्त्तव्येति भावः उपमालंकारः॥ १०॥ नन्वेवं स्वार्थपरत्वदोषः स्यादिति चेन्न लोकानुग्रहार्थत्वादस्याः

उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता। समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च॥ १०॥ छ
न दूये सा लतीमन्नुर्यन्मम स्वमपराध्यति॥ यत्तु दह्यते लोकमतो दुःखाकरोति माम्॥ ११॥ छ

प्रकृते सित्याशये नाहनदूने ति सलतीऽयसंखीसालती नाम हरेः पितृष्वसा उत्सादिभ्योऽञ् तस्याः मन्युर्गवो वंधुरपि खले
न मृष्यते इति भावः समस्वमपराध्यति दस्यतीति यत् क्रुधद्रुहेर्ष्यादिना चतुर्थी नदितिशेषः यत्तदोर्नित्यसंबंधात् नदू
येनपानिष्ये दूये देवादिकात्कर्त्तरिल्लोडुत्तमपुरुषैकवचनं किन्तु लोकं दस्यते गर्हितं दहतीति यत् लुपसदचरजपजभद
हशगृभ्यो भावगर्हायामिति यङ् जपजभदहदशभंजपशांवेत्यभ्यासस्य नुगागमः अतो लोकदहनं मां दुःखाकरोति दु
खमनुभावयतीत्यर्थः दुःखात्प्रातिलोम्ये इति डाच् सत्सः अन्यस्मैदापयामि यानन्ययः पार्थास्तु सार्थनयापि पश्चात्समाधे

राम:
४

स्खलनं निगमपन्थरमनं मुमुक्षुः एतन्नि नेनेति तावत्त्वन्मतत्त्वप्रयाणपर्यन्तमित्यर्थः मम मनमिदं । अंगेसामंत्रणे व्ययं
अथ संबोधनार्थकाः स्युः पाट्प्याडंगहे हैभोइत्यमरः वंयुवयोरपि युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावावि
तिवामादेशः मनं भ्रूणां विधौलोट् नदपि मयाक्षातं संश्रम्यथा न संदेहानिवृत्तेरितिभावः विदुषस्तेकुतः संदेहस्तत्राह
ज्ञानसारो ज्ञाततत्त्वार्थोपिकः कार्यवस्तुनि कर्त्तव्यार्थे संदिग्धे संशेते अतो ममापि संदेह इत्यर्थः दिह उपचये कर्तरि लिट्

मम नाथ त्वन्मतमदः श्रूयतां मंगवामपि ॥ ज्ञानसारोपि खल्वेकः संदिग्धे कार्यवस्तुनि ॥ ९२ ॥ यावदर्थ
पदां वाचमेवमादाय माधवः ॥ विरराम महीयांसः प्रकृत्या मितभाषिणः ॥ ९३ ॥ रामाय नमः ॥

घलंधलं मामास्थेन विशेषमसमर्पनिरूपोर्थान्तरन्यासः ॥ ९२ ॥ यावदिति माधवो हरिर्यावानर्थो यावदर्थं यावदवधा
रणे इत्यव्ययीभावः यावदर्थं यथार्थपदानि पदस्यास्तामभिधेयसंमितामक्षरामित्यर्थः वाचमादाय गृहीत्वा उक्त्वेत्यर्थः
विरराम तूष्णीमास आङ्परिभ्यो रमः इति परस्मैपदं तथाहि महीयांसः उत्तमाः प्रकृत्या स्वभावेन मितभाषिणो भ
वन्तीति शेषः तथालापनिषेधादिति भावः पूर्ववदलंकारः ॥ ९३ ॥ १३ ॥ १२ ॥ ७ ॥ ७ ॥ ३ ॥

मा०टी०द्वि०
५

अथाष्टभिः कुलकेन रामं वर्णयन्नुद्याकामवतारयति ततइति ततो रामो जगादेत्युत्तरेणान्वयः सपत्नो रिपुः रिपुर्वै
रिसपत्नारिरित्यमरः तस्यापनयः अपकारस्तस्य स्मरणे नयोऽनुशयः पश्चात्तापः भवेदनुशयो द्वेषे पश्चात्तापानुबंधयो
रितिविश्वः तेन स्फुरन्नोतिस्फुरन्नोष्ठौ ओष्ठौ विं [illegible] वमिवेत्युपमितसमासः रामायाः ओष्ठबिम्बस्य चुंबनेनावित्तो रामोष्ठबिं
वचुम्बनचुंचु लेन वित्तश्चुंचुप्चणपाविति चुंचुप्रत्ययः ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम् तेनोष्ठेनोपलक्षि

ततः सपत्नापनयस्मरणानुशयस्फुरा । ओष्ठेन रामो रामोष्ठबिम्बचुंबनचुञ्चुना ॥५४॥
विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृताम् । आपयन्त्यवनव्याधोर्गिरमुत्तरपक्षताम् ॥५५॥

तः समरसुरतयोः समरसइत्यर्थः उपमानानुप्रासयोः संसृष्टिः ॥ ५४ ॥ विवक्षितामिति विवक्षितां वक्तु
मिष्टां वचोऽभिमानत्वात्तत्रैव कुमिष्टां वचो ब्रूञो वा सत्वन्नाक मर्णति कः तत्क्षणेविपक्षास्तरणे एवेत्यविलं येनोक्तिः प्रति
संहृतां रामानुरोधान्निरुद्धामर्थविदः कार्यज्ञस्यात एव पयन्व्याधेरुद्धवस्य गिरं उत्तरपक्षतां सिद्धान्तपक्षतां
आपयन्त्वयमसस्पक्षावलंबितिहादिति भावः अनेनापमस्यप्रागनोक्ता ॥ १५ ॥ १५ ॥ = = ॥ छ रामः
५

घूर्णायन्निति पुनः मदिरास्वादेन मद्यपानेन यो मदस्तेन पाटलिता रक्तीकृता द्युतिर्ययोस्ते । रेवत्या देव्या वदने यदुच्छिष्टं मद्यलेपं
तांबूलादि अक्षिचुंबनसंक्रान्तमिति भावः तेन परिपूर्णे पुटे ययोस्ते दृशौ घूर्णायन् भ्रामयन्निति मद्यविकारोक्तिः उच्छिष्ट
परिपूर्णेत्यत्र रतिकाले मुखं स्त्रीणां शुद्धमाखेटके शुनामिति स्मरणात् उच्छिष्टपानवत्त्वविरोधस्याभासत्वाद्विरोधाभासोलंका
इति ४ रः आभासत्वे विरोधस्य विरोधाभास उच्यते लक्षणात् ॥ १६ ॥ आश्लेषेति पुनः आश्लेषे लोलुपाभ्यां आलिंगनतृष्णाभ्यां व
ध्वाः स्तनयोः कार्कश्यस्य काठिन्यस्य साक्षिणी उपद्रष्टारौ निसंपीड्यमानत्वेनेति भावः साक्षाद्द्रष्टरि संज्ञायामिति साक्षाच्छब्दादिनि

घूर्णायन्मदिरास्वादमदपाटलितद्युती ॥ रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ ॥ १६ ॥ आश्लेषलोलुपं(पे) वधूस्त
नकार्कश्यसाक्षिणीम् ॥ म्लापयन्नभिमानोष्णैर्वनमालां मुखानिलैः ॥ १७ ॥ दधत्संध्यारुणव्योमस्फु
रत्तारानुकारिणीः ॥ द्विषद्द्वेषोपरक्ताङ्गसंगिनीः स्वेदविप्रुषः ॥ १८ ॥ राधादामोदराभ्यां नमः ॥ छ

प्रत्ययः वनमालामभिमानोष्णैः अहंकारतप्तैर्मुखानिलैः निश्वाससमारुतैः म्लापयन् (प) कंपयन् म्लापयतेर्णिजन्तात् शत्रा
देशः आदेच इत्यात्वे पुगागमः अम्लाने म्लानसंबंधाभिधानादतिशयोक्तिः ॥ १७ ॥ दधदिति पुनः संध्यायामरुणे
व्योम्नि स्फुरंती तारा अनुकुर्वन्तीति तथोक्ताः द्विषतः शत्रोर्द्वेषेण रोषेणोपरक्ते अंगे वपुषि संगिनीः सक्ताः स्वेदवि
प्रुषः स्वेदबिन्दून् पृषन्ति बिन्दुपृषतः पुमांसो विप्रुषः स्त्रियामित्यमरः दधद्धानः नाभ्यस्ताच्छतुरिति नुमभावः उपमालं

का० ॥ ४७ ॥

श्रोत्रन्तदिति · पुनः सर्कर्षणोत्तंसतो कुंडलयोः श्रोत्राणां स्मृतानां पद्मरागदलानां मालिकयाः शकलानां लिपिकाकान्त्या शो
तेति अपूर्वो हिन्नः कर्मणि क्ते यजादित्वात्संप्रसारणम् । कृष्णोत्तरासंगो नीलोत्तरीयम् · दोआचारो न रासं नो समो रहति का
न्तया · संध्यानम् उत्तरीयं चेलमतो · नस्फुरञ्चं चूतपल्लवस्पेमां चीनपल्लवी मिव दधत् · लोहितमिश्रणाच्चूतपल्लववर्ण्णत्वं
कुर्वन्निसर्थः · धूम्रलोहितलोहिताविति अमरः · वचनात् अत्राप्यन्यत्र चोत्पद्यत्वात् पात्राद्वयाक्षेपान्निदर्शनालंका
रः ॥ ३९ ॥ ककुद्मीति · पुनः ककुद्मिकन्यायाः रेवत्याः वक्त्रस्यान्तअभ्यन्तरवासेन स्थित्या लब्धोऽधिवासो वासनाययासा

श्रोत्रसत्कुंडलश्रोत्रपद्मरागदललिपिः । कृष्णोत्तरासंगरुचं विदधच्चीनपल्लवीम् ॥ ३९ ॥
ककुद्मिकन्यावक्त्रान्तर्वासलब्धाधिवासया । मुखामोदं मदिरया कृतान्वाधमुद्वमन् ॥ ४० ॥

तया तन्मुखसौरभवासितयेत्यर्थः · संस्कारोगंधमाल्याद्यैः अधिवासनमुच्यते · मदिरया कृतानुबाधं कृतसंसर्गं पिया
गंडूषगंधिनमित्यर्थः · अधजपोरनुपसर्गेस्त्वनुपसृष्टाद्बधसपविधानमुपसृष्टात्वधेर्घत्रप्रत्ययः · मुखामोद
स्वमुखगंधावबोधं आमोदः सोऽतिनिर्हारी इत्यमरः · उद्वमनुद्गिरन् अनुमदिरया एव मुखवासः स्वगंधातिरोधानेन
तामामुखगंधगंडूषमधुगंधस्वीकारतद्गुणयोगत्रोत्तरस्मोत्तरविशेषकत्वेन पूर्वसापेक्षकत्वादंगांगिभावेन सं

जगादेति· वदनमिति छद्म कपटं यस्य तत्तस्य वदनमेव पद्ममित्यर्थः॥ छलादिशब्देनासत्यत्वप्रतिपादनरूपोऽपह्नवः तस्य प
र्यन्तपातिनः प्रान्तचारिणो मधूनि लेढीति मधुलिहः मधुपस्य लिहन्तेः क्विप् उदग्रैरुच्छ्रितैर्दशनांशुभिः श्वैत्यं धावल्यं न
यन्निजगाद तद्गुणालंकारः तस्य मधुपसन्निधावपकारापह्नवसापेक्षत्वेन न संकरः॥२१॥ रामो जगादेत्युक्तं किं
तदित्याकांक्षायामाह कुलकम् यद्वेति· वासुदेवेन अदीनमित्यदीनमकातरं नास्त्यादीनवो दोषो यस्येत्यनादीनवं निर्दोषं

जगाद वदनच्छद्मपद्मपर्यन्तपातिनः॥ नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः॥२१॥ अथ श्लोकान्त·
कुलकम्॥ यद्वासुदेवेनादीनमनादीनवमीरितम्॥ वचसस्तस्य सपदि क्रिया केवलमुत्तरम्॥२२॥ छ

दोष आदीनवो मलः इत्यमरः· यद्वचनमीरितं उक्तं निष्ठमानस्तु परइत्यादिना यानयक्षमाख्यिस यदुक्तमित्यर्थः·
तस्य वचसः सपदि क्रियाकेवलं सद्योऽनुष्ठानमेवोत्तरं सिद्धान्तस्येवोत्तरं सिद्धान्तस्येवोक्तत्वादिति भावः॥२२॥
अथ तदेव प्रतिपादयिष्यन् अन्यातिशायनयोपस्करोति·नैनादिति· लघु संक्षिप्तमपि एनद्वचः भूयस्य बहुतर
याविस्तनयापीतियावत् द्विवचनविभज्येत्यादिना ईयसुनि· बहोर्लोपो भू च बहोरिति इकारलोपो बहो

थभूरादेशः ॥ वाचा नातिशय्यते नातिरिच्यते गुर्वर्थत्वादिति भावः ॥ शीङः कर्मणि लट् यक् ॥ अयङ् यि क्ङितीत्ययङादेशः
नजयति ॥ इंधनौघान् दहतीति इंधनौघधक् काष्ठराशिदाहकः भूयानपीत्यर्थः ॥ क्विपि घत्वं भष्भावः ॥ अग्निस्त्विषा प्रभया
पूषणं सूर्यमल्पीयसमपीति भावः ॥ नात्येति नातिक्रामति तेजसः प्रभावत्वमिदं वचसोऽर्थवत्त्वमलंघ्यमित्यर्थः ॥
असमानधर्मविम्बप्रतिबिम्बदृष्टान्तालंकारः ॥ २२ ॥ यदि हरिवचो नातिशय्यते अलं तर्हि तत्रापि वाग्विस्तरेणेत्याह सं
क्षिप्तस्येति ॥ अतो हरिवचसो नातिशय्यनीयत्वात् स्वस्य सुविस्तरतराः प्रपंचतराः अथ तेषां वचःशब्द इति घञ् प्रतिषेधः ॥ अस्यैव

नैनं हन्त्यपि भूयस्त्वं चोवा चातिशय्यते ॥ इंधनौघधगप्यग्निस्त्विषा नात्येति पूषणम् ॥ २३ ॥
संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः ॥ सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे ॥ २४ ॥

पूर्वेणान्वयः संक्षिप्तस्याल्पाक्षरस्याप्यर्थेन गरीयसः सूत्रकल्पस्येत्यर्थः ॥ अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखं ॥ अस्तोभमनव
द्यं च सूत्रं सूत्रविदो विदुरिति लक्षणात् ॥ अस्यैव वाक्यस्य नान्यस्य भाष्यभूताः भाष्यैः समाः नित्यतः स्वादेवं ततो चभूतं वक्तीवंस
मेचितेति धिति वैजयन्ती ॥ भवन्तु व्याख्यानरूपा भवंत्वित्यर्थः ॥ सूत्रव्याख्यानविशेषो भाष्यं ॥ सूत्रस्थं पदमादाय वाक्यैः सूत्रानु
कारिभिः स्वपदानि च वर्ण्यंते भाष्यं भाष्यविदो विदुरिति ॥ मया तु न देवविशेषप्रकाशनाय व्याख्यायमानत्वनिरूपणाय प्रस्या व्याख्यायत

इत्थं यामं सिद्धान्तयित्वा तत्रोद्भवमनिरोधं हृदि निधाय त्रिभिः प्रत्याचष्टे· विरोधीति· कृतीनां कुशलानां गिरः कर्म्म विरो
धवचसः प्रतिकूलवादिनो वागीशान् वक्तृनपि वदो वदावदो वक्ता वागीशो वाक्पतिः समौ इत्यमरः मूकान् निर्वाचः कुर्वते भजनी
यर्थः अनुलोमाऽनुकूलोऽर्थोऽभिधेयो येषां तेऽनुलोमार्था अनुकूलवादिनस्तान् जडान् मंदानपि प्रवाचः प्रगल्भान् कुर्वते अतो ना
स्मद्गिरः प्रतिवाच्या इति भावः अत्र वागीशानां मूकीकरणात् जडानां प्रवाक्करणाच्चाशक्यवस्तुवर्णनारूपो विरोधोऽलंकारः भे
दे संबंधरूपातिशयोक्तिश्चेति भोतथेति संकरः अथ गम्भासलीनेन स्वामिना वृद्धैः फलमनग्रह इति न्यायेन शास्त्रवचनं प्रतिकूल

विरोधिवचसो मूकान्वागीशानपि कुर्वते। जडानप्यनुलोमा
नः२५ः थान्प्रवाचः कृतिनां गिरः॥२५॥ रामचन्द्राय नमः॥ श्रीः॥२५॥



अपि आह मे वै स्पाशंक्याह· पटिति· दुष्टा मेधा येषां ते दुर्मेधसो मंदबुद्धयोऽपि· नितम सिद्ध्रजामे श्रयो रिति समासान्तो
नम प्रत्ययः· यथानो मनसादीनधीस पठित्वा गुणाः संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्याः षट्· शक्तयः
प्रभुमंत्रोत्साहाख्यास्तिस्रः सिद्धयः पूर्वोक्तशक्तित्रयसाध्या उत्पार्थलाभार्थकामालकाक्षिलः शुभावसिद्धिमं
त्रसिद्धिरुत्साहसिद्धिश्चेति· उदयाः वृद्धिक्षयस्थानानि कृत्वा न्यायेनोदयाउच्यन्ते· तत्र वृद्धिक्षययोस्वशक्तिसि

ध्योः पूर्वावस्थानं तदुपचयापचयोः स्थानं तेन चयक्षयः इति इत्येतानि सर्वाणि व्याकर्तुं व्याख्यातुमलं समर्थाः पर्याप्तिवचने
ष्वलमर्थेष्विति तुमुन्प्रत्ययः पंचांगनिर्णयशक्तिविकलानां मध्यादिस्वरूपमसंख्यामात्रपाठकानामशास्त्रज्ञत्वात् दुष्
वादृयोन ग्राह्यवचना इत्यभिसन्धिः अत्रामरः। संधिर्नाविग्रहो यानमासनं द्वैधमाश्रयः षड्गुणाः शक्तयस्तिस्रः प्र
भावोत्साहमंत्रजाः क्षयस्थानं च वृद्धिरित्यत्रिवर्गो नीतिवेदिनामिति तत्रारिविजिगीषोर्व्यवस्थाकरणमेकत्र संधिविरो
धो विग्रहः विजिगीषोररिं प्रति यात्रा यानं तयोर्मिथः प्रतिबंधशक्तयोः कालप्रतीक्षार्थं तूष्णीमवस्थानमासनं दुर्बलस्य

षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः॥ ग्रंथानधीत्य व्याकर्तुमिति दुर्मेधसोप्यलम्॥ २६॥
अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा॥ निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम्॥ २७॥

प्रबलविद्विषो वाधिकमात्मसमर्पणं द्वैधीभावः अरिणा पीड्यमानस्य बलवदाश्रयणं संश्रयः कोशदंडोत्थं तेजः प्र
भावः कर्तव्यार्थेषु स्थैर्यादिप्रयत्न उत्साहः षड्गुणविलननं मंत्रः गतामन्यदिति समसंक्षेपः॥ २६॥ ननु शास्त्रोक्तार्थ
व्याख्यातेव शास्त्रज्ञः स एव ग्राह्यवचनश्चेत्याशंक्य नेत्याह अनिर्लोडितेति। अनिर्लोडितमनालोडितं कार्यं येन
तस्य कार्यमजानतः इत्यर्थः वाचोऽस्य सन्तीति वाग्मी वावदूकः वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरीत्यमरः वा
चोग्मिनिरिति ग्मिनिप्रत्ययः तस्य वाग्जालं वागाडंबरः निमित्तात् लक्ष्यात् वेध्यं लक्ष्यं शरव्यं च निमित्तं च सम

विदुरिति वैजयन्ती· अपराद्धेषोः स्खलितबाणस्य· धनुःप्रहरणमस्यास्तीति धान्वुष्को धन्वी तस्य· प्रहरणमिति ठक्· इत्युक्त
फलानाल्कः· अपराद्धपृषत्कोसौ लक्ष्यापभ्रष्टसायकः· धन्वी धनुष्मान्धानुष्कः इत्यमरो· तस्य वल्गितमिव वृथानिःफ
लं· कार्यज्ञस्य वचो ग्राह्यं न तु वाचाटस्येति भावः॥ २७॥ इदं च पञ्चाङ्गादिपाठमात्रेण मन्त्र इति सिद्धं· संप्रति स्वयं मन्त्रस्वरूप
माह· सर्वेति· सर्वाणि कार्याणि संधानादीनि तानि शरीराणीव स्वरूपाणि तत्समासः· आस्ते सौगतानामिव लिङ्गानां तेषु कार्यशरीरेषु नि ४
सर्वेषु शरीरेष्विव सर्वकार्येष्वित्यर्थः· अङ्गानि स्कन्धाइवेति पूर्ववत्समासः तेषां पञ्चकं मुक्त्वा स्कन्धपञ्चकं हित्वेत्यर्थः· पञ्चपरिमाण

सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम्· ॥ सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्· ॥ २८ ॥ छ

मस्येति पञ्चकं· संघः संख्यायाः संज्ञायाः· संघस्त्रात्प्रपत्येति कन्प्रत्ययः· सुगतो भक्तिर्भजनीयः एषामस्तीति सौगताः बौ
द्धाः भक्तिरिसराः· तेषामन्य आत्मेव महीभृतामन्यो मन्त्रो नास्ति· कर्मणामारम्भोपायः पुरुषद्रव्यसंपत्तिः देशकालविभागो
विनिपातप्रतीकारः कार्यसिद्धिश्चेति पञ्चाङ्गानि· यथाह कामन्दकः सहायाः साधनोपाया विभागो देशकालयोः· विपत्ते
श्च प्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते इति· रूपवेदनाविज्ञानसंज्ञासंस्काराः पञ्च स्कन्धाः· तत्र विषयप्रपञ्चो रूपस्कन्धः· तत्र ज्ञानप्रप
ञ्चो वेदनास्कन्धः· आलयविज्ञानसन्तानो विज्ञानस्कन्धः· नामप्रपञ्चः संज्ञास्कन्धः· वासनाप्रपञ्चः संस्कारस्कन्धः· एवं पञ्चधा
परिवर्तमानो ज्ञानसन्तान एवात्मेति बौद्धाः· एवं च यथा बौद्धानां सर्वेषु शरीरेषु स्कन्धपञ्चकातिरिक्त आत्मा नास्ति तथा

राज्ञां मुख्यांगपंचकानि रिमंत्रो नास्तीत्युपमालंकारः न चास्माकं समग्रमेवेत्ययमेव यात्राकाल इति भावः ॥२८॥ अथ मं
त्रिनार्थक्रियाविलम्बदोषमाह· मंत्र इति· संवृतैः गुप्तैः सर्वांगैः पूर्वोक्तैः सहायादिभिरुपायैः स्थलादिभिश्चोपलक्षितोपि स
र्वाङ्गसंवृतोपि सर्थः· मंत्रो विचारः अधीरो भीरुः युध्यत इति योधो भट इव परेभ्यो ऽन्येभ्यो ऽरिभ्यश्च परोन्यः श्रे
ष्ठमुख्येषु परोऽरिपरमात्मनोरिति वैजयन्ती· भेदो विदारणं तत्तीयमामिलंच· तस्य शंकया चिरं स्थातुं विलंबितुमित्य
र्थः· न सहते न क्षमते इत्यर्थः शकधृषसहितनात्तुमुन्· अतो न विलंबितव्यं· अन्यथा मंत्रभेदे कार्यहानिः स्यादिति भावः॥

मंत्रो योध इवाधीरः सर्वांगैः संवृतैरपि ॥ चिरं न सहते स्थातुं परेभ्यो भेदशंकया ॥२९॥ आत्मोदयः
परज्यानिर्द्वयं नीतिरितीयती ॥ तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते ॥३०॥ ❀ ॥३०

२९॥ किंच· नीतिसर्वस्वरूपपर्यालोचनयापि न विलंबः कार्य इत्यभिप्रेत्याह· आत्मोदय इति· आत्मन उदयो वृद्धिः परस्
य शत्रोर्ज्यानिः हानिः· ज्या ज्याहाल्ल रिभ्यो निरित्योणादिको निप्रत्ययः इति· द्वयमिदं परिमाणमस्यास्तीति इयती एता
वती· किमिदंभ्यां वो घः इति वतुप् इगादेश्चेति ङीप्· इति नीतिसंग्रहः· एतद्व्यतिरिक्तो न कश्चिन्नीतिपदार्थोस्तीति
अर्थः· यद्वा षाड्गुण्यादिविस्तारोपि सर्वोप्यस्यैव प्रपंच इत्याह· तदिति· तत् द्वयमुरीकृत्य अंगीकृत्य ऊरीकृत उररीकृत्यमंगीकृ

नमित्यमरः ऽ र्यादिष्वित्यादावश्चेतिगतिसंज्ञायां कुगतिप्रादय इति कौत्स्यवादेशः स्तुतिभिः कुशले स्तुतौ कुशल इत्यमरः वा
चस्पतेर्वाक्यं नितांतं वाग्मित्वं कस्मादित्याह उक्तः स तैः पक्षाः पतिपुत्रेत्यादिना सत्यमिति स्वामी तत्कंठे तो विषयत्वात् ब्रा
ह्मणादिष्वप्यन्वय इत्यर्थः गतायते विस्तार्यते कर्मणि लट् तेनोत्तरैः क्रोशालं तस्मात्दुल्लोदयार्थिभिरविलंबाद्धन्तुरुद्धितव्यः
तत्रान्तरीयत्वात्तस्येति भावः ॥ ३०॥ ननु लक्ष्मोदयस्य किं परोक्षितेत्यत्राह तृप्तियोग इति महीयसां महात्मनां परेणापि
प्रभूतेनापि महिम्ना ऐश्वर्येण तृप्तियोगः सन्तोषलाभो न अचत स्वभावे पूर्णः सन् चंद्रोदयाकांक्षी स्वधर्धमिति भावः त

तृप्तियोगः परेणापि न महिम्ना महीयसाम् ॥ पूर्णश्चंद्रोदयाकांक्षी दृष्टान्तोऽत्र महार्णवः ॥ ३१॥
संपदा सुस्थिरंमन्यो भवति स्वल्पयापि यः ॥ कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम् ॥ ३२॥

हार्णवो दृष्टान्तो निश्चयो यस्मिं दृष्टान्तो निदर्शनमुपमानमिति भावः नराज्ञा स्वल्पबलं बुद्धिः कार्या असंतुष्टा द्विजा
नष्टाः संतुष्टा इव पार्थिवा इति न्यायादिति भावः नायं दृष्टान्तालंकारः बिंबप्रतिबिम्बाभावेनोपमेयस्याप्यसत्त्वेन तस्योत्
थानात् किंतु दृष्टान्तशब्देन तस्याभिधानादुपमालंकारः अत एव दृष्टान्तोदाहरणनिदर्शनरूपाः शब्दा न प्रयोक्त
व्याः यैन तस्यापत्तेरित्येकावलीकारः ॥ ३१॥ तथापि संतोषे दोषमाह संपदेति यः स्वल्पयापि संपदा सुस्थिरमा
त्मानं मन्यत इति सुस्थिरंमन्यः स्वस्थमानी भवति आत्ममाने खश्चेति खश् प्रत्यये मुमागमः तस्याल्पसन्तुष्टस्य

सलज्जा गणिका नष्टा निर्लज्जा च कुलाङ्गना ४

नास्त्यल्पसंपदेकान्तकृतसत्त्वावनेवकृतार्थो विधिरेवमपि न वधयतीत्यर्थः मन्ये योदयहीनाश्चमपि न गुणस्तानन्तरस्मात्
परार्थ्यादिति भावः॥ ३२॥ किंच पराक्रमलब्धस्य चोदयो नान्यलभ्य इत्याह समूलेति। मानिनोऽभिमानवन्तः परान् शत्रून्
समूलं हत्वा इति समूलघातमघ्नन्तोऽनुन्मूलयन्त इत्यर्थः। समूलाकृतजीवेषु हन्कृञ्ग्रहः इति णमुल्प्रत्ययः कषादिषु य
थाविध्यनुप्रयोगः इति हन्तेरनुप्रयोगः। नोद्यन्ति किन्तु हत्वैवोद्यन्तीत्यर्थः। तमहत्वैवोदये अंधयन्ती प्रध्वंसितं गाढं पन्नमोऽन्ध
तमसं ध्वान्ते गाढेऽन्धतमसमिति अमरः। अवसमन्धेभ्यस्तमस इति अच्प्रत्ययः। प्रध्वंसितं तमं धतमसं येन स उदयाभागीति भा

समूलघातमघ्नन्तः परान्नोद्यन्ति मानिनः। प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः॥ ३३॥ रामः ७
विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा। अनीत्वा पंकतां धूलिमुदकं नावतिष्ठते॥ ३४॥ ७

वः। रविरुदाहरणं दृष्टान्तः। अत्रापि दृष्टान्तो नत्रमहार्णवइति पूर्ववदुपमालंकारेण दृष्टान्ताइति द्रष्टव्यम्॥ ३३॥ किंचानुच्छि
न्नशत्रोः प्रतिष्ठैव दुर्घटा इत्याह विपक्षमिति। विपक्षं शत्रुमखिलीकृत्याखिलमच्छिन्नमकृत्वाऽनुन्मूल्येत्यर्थः। प्रतिष्ठा
दुर्लभा खलु तथाहि उदकं कर्तृ धूलिं स्वपरिभाविनीमिति भावः पंकतामनीत्वाऽनधः कृत्वेत्यर्थः नावतिष्ठते किन्तु
नीत्वैवतिष्ठतीत्यर्थः समवप्रविभ्यः स्थ इत्यात्मनेपदम्। वाक्यभेदेन प्रतिबिम्बनात्प्रेक्षा दृष्टान्तालंकारः॥ ३४॥ ७ रामः ९०

नन्वयमेकाकी शिशुपालः किमस्माकं करिष्यतीत्याशंक्याह· द्विषतामिति· एकोपिरिपुर्यावद्विषतेऽवतिष्ठते· तज्ज्ञावस्थाने
इति धातोर्लोडादिकालकर्तरि लट्· शिड्लायगिलक्षुइतिशिजादेशः· तावत्तदवधि सुखं कुतः· यावत्तावच्चसाकल्येऽवधावित्यमरः· त
थाहि· सिंहिकायाअपत्यं पुमान्सैंहिकेयो राहुः· तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदस्तमः· स्त्रीभ्यो ढक्· असुरद्रुहां देवा
नां पुरोऽग्रे सोमं क्लिश्नाति बाधते हि शत्रुर्यात्सोमग्रहणं सूर्यस्येति भावः· तस्मादेकोपि शत्रुः छेत्तव्यः इति भावः· अत्रैकः शे
षस्य ढक्संश्रयोः शोषनशेषमेदिति नासर्थ विशेषण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः॥ ३४॥ ननु कृष्णप्रेयं चेद्यः

द्विषतां यावदेकोपि रिपुस्तावत्कुतः सुखं॥ पुरः क्लिश्नाति सोमं हि सैंहिकेयोसुरद्रुहाम्॥ ३५॥

किन्नः करिष्यतीत्याशंक्य तस्य बलवत्तां व कुमित्रामित्रबलाबलविवेकं तावत्कथयति· सखेति· क्रियया उपकारापकारा
भ्यां तद्रूपया निर्वृत्तः क्त्रिमः· ड्वितः क्त्रिः· क्त्रेर्मन्नित्यम्· मखबाहुदन्तगरीयान्बलवान्· एवं शत्रुश्च कृत्रिमो गरीयान्· कुतो
हि यस्मात् मौ कृत्रिममित्रशत्रू कार्येण उपकारापकाररूपकार्यवशात् निर्वृत्ताविति जितौ शेषः· उक्तकार्योपाधेर्यावज्जीवम
नपायात् दानयोर्मित्रामित्रभावोऽप्यनपायी निसर्गसम्भव मित्रभावः सहज शत्रुत्वोत्पन्नेव मित्याह· स्वाभाविकेति·

सहजातः सहजः एकशरीरावयववान् तत्र सहजमित्रं मातृष्वस्रेयपैतृष्वस्रेयादिः सहजशत्रुः पितृव्यसुतादिः
प्रकृत्या सिद्धः प्राकृतः पूर्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः तत्र विषयानन्तरः प्राकृतशत्रुः तदनन्तरः प्राकृतमि
त्रमपीत्यर्थः तौ सहजप्राकृतौ तु शत्रुमित्रे वा मित्रामित्रे वा स्यातां तावपि कार्यवशादनियमेनोभयरूपतामापद्येते न
तु कृत्रिमशत्रुमित्रं कृत्रिमशत्रुः शत्रुरेव मित्रं मित्रमेवेति कृत्रिमावेव मित्रामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृता
वित्यर्थः एतेन कृत्रिमत्वं सर्वापवादीति सिद्धम् ॥ ३६ ॥ एवं चेदस्माकं पैतृष्वस्रेयः शिशुपालः सहजमित्रत्वात्संधा

स्त्वव्य गरीयान्कृत्रिमस्तो हि कार्यतः ॥ स्यातामभित्रौ मित्रे च सहजप्राकृतावपि ॥ ३६ ॥ उपक
र्त्रारिणा संधिर्न मित्रेणापकारिणा ॥ उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ ३७ ॥ ७ ॥ ६७

नन्वेवमनुपपन्नमित्याशंक्याह उपकर्त्रेति उपकर्त्रा उपकारकारिणारिणापि सहजेन प्राकृतेन वेत्यविशेषः संधिः कार्यः
शत्रुत्वापवादेन कृत्रिमशत्रुताया बलीयस्त्वात् यावज्जीवभाविन्यास्तत्रोत्पन्नत्वादिति भावः एवमपकारिणा मित्रेणा
पि सहजेन प्राकृतेन वेति भावः संधिर्न कार्यः मित्रत्वापवादेन कृत्रिमशत्रुतायाः बलीयस्त्वात् यावज्जीवभाविन्या
स्तत्रोत्पन्नत्वादिति भावः ननु साक्षादरिणा कथं संधानं मित्रेण वा कथं विरोध इत्याशंक्य क्रियायानयोर्वै

परित्याज्य इत्याह हि यस्मादुपकारापकाराभ्यामेवनयोर्मित्रामित्रयोर्लक्षणं स्वरूपं लक्ष्यं द्रष्टव्यम् उपकर्त्तैव मित्रं अपकर्त्तैव श-
त्रुरित्यर्थः तस्मात्सहजमित्रत्वेपि क्रियया शत्रुत्वाद्घातनमेवेति भावः ३७ अथ चैद्यस्य कृत्रिमशत्रुत्वं चतुर्भिराह त्वयेति हे हरे रु-
क्मिणीहरता बंधुभिस्तस्मै दत्तां राक्षसधर्मेणाहृते त्यर्थः राक्षसो युद्धहरणादिति याज्ञवल्क्यः गांधर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृता स्न
विति मनुः त्वया चैद्यो विप्रकृतो विप्रियं प्रापितः तथाहि वृद्धमूलस्य कृत्यमूलस्य वैरतरोः स्त्रियो महत्यथा नमूलं हि रूपकसंसृष्टोयम
र्थान्तरन्यासः सामान्येन विशेषणसमर्थनरूपोर्थान्तरन्यासः ३८ अथ तेनापि त्वं विप्रकृत इत्याह त्वयीति त्वयि भ्रूसरपरसंयुगमासंभोगमन

त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ३८ त्वयि भोगसंगते जेतुमरोत्सीत्सपु पारस्न
रीमिमां प्रोषितार्यमणं मेरोरंधकारस्तटीमिव ३९ आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् कथापि खलु पापानामलमश्रेयसे हृषेरनिटीत्वति
यतः ४०
रकासुरस्य जेतुं गते सति स चैद्य इमां पुरीं द्वारकां प्रोषितोऽर्यमा सूर्यो यस्यास्तां मेरोस्तटीमात् अंधकार इवारोत्सीत् रुरुधेत्यर्थः ३८ निविरहफ्नि आ१५८
अपकारान्तरमाह आलप्येति स चैद्यो बभ्रोर्यादवभेदस्य दारान्भार्याः भार्या जाया पुंभूम्नि दाराः स्यात्तु कुटुंबिनी त्यमरः अपाहरत् हृतवानिति यदिदं
दारापहरणमालप्यालं नालपनीयमित्यर्थः अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वेति क्त्वाप्रत्यये समासे ल्यबादेशः यतः पापानां पापिनां क-
थाकथनमुच्चारणमपि चिंतिश्रुतिकथिकुंभिवर्च्चश्चेति ङ प्रत्ययः अश्रेयसे नर्थाय अलं समर्थः शक्ता खलु नमः स्वस्तीत्यादिना चतुर्थी अ-
नभिधेयमानो लपनकार्यमश्रेयःप्राप्तिः तत्सुखेनैतत्कारणालपने निषेधसमर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः ४० ॥

सहजातः सहजः एकशरीरावयववान् तत्र सहजमित्रं मातृस्वस्रेयपैतृष्वस्रेयादिः सहजशत्रुश्च पितृव्यसुतादिः
प्रकृत्या सिद्धः प्राकृतः पूर्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः तत्र विषयानन्तरः प्राकृतशत्रुः तदनन्तरः प्राकृतमि
त्रमपि स्यादित्यर्थः तौ सहजप्राकृतौ तु शत्रुमित्रे वा मित्रामित्रे वा स्यातां तावपि कार्यवशान्नियमेनोभयरूपतामापद्येते न
तु कृत्रिमशत्रुमित्रे कृत्रिमशत्रुः शत्रुरेव मित्रं मित्रमेवेति कृत्रिमावेव मित्रामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृता
वित्यर्थः एतेन कृत्रिमत्वं सर्वापवादीति सिद्धम् ॥ ३६ ॥ एवं चेदस्माकं पैतृष्वस्रेयः शिशुपालः सहजमित्रत्वात्संधा

सखा गरीयाञ्छत्रुश्च कृत्रिमस्तौ हि कार्यतः ॥ स्यातामित्रौ मित्रे च सहजप्राकृतावपि ॥ ३६ ॥ उपक
र्त्रारिणा संधिर्न मित्रेणापकारिणा ॥ उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ ३७ ॥ छ ॥ छ

नव्यो न तु यानमथ इत्याशंक्याह उपकर्त्रेति · उपकर्त्रा उपकारकारिणाऽरिणापि सहजेन प्राकृतेन वेति शेषः संधिः कार्यः
अरित्वापवादेन कृत्रिमशत्रुताबलीयस्त्वात् यावज्जीवभाविन्याः सत्रोल्पत्वादिति भावः एवमपकारिणा मित्रेणा
पि सहजेन प्राकृतेन वेति भावः संधिर्न कार्यः मित्रत्वापवादेन कृत्रिमशत्रुताया बलीयस्त्वात् यावज्जीवभाविन्या
स्तत्रोऽसन्नत्वादिति भावः ननु साक्षादरिणा कथं संदध्यान्मित्रेण वा कथं विरुध्यादित्याशंक्य क्रियायां न तयोर्वै

परिस्याद्दोषइत्याह हि यस्मादुपकारापकारावेव तयोर्मित्रामित्रयोर्लक्षणं स्वरूपं लक्ष्यं द्रष्टव्यम् उपकर्त्रैव मित्रं अपकर्त्रैवा
रिरित्यर्थः तस्मात्सहजमित्रत्वेपि क्रियया शत्रुत्वाद्यानवमन्तव्योरिभावः ३७ अथ चैद्यस्य कृत्रिमशत्रुत्वं चतुर्भिराह त्वयेति हे हरे रु
क्मिणीहरता बंधुभिस्त्वत्तः स्वं कन्यां राक्षसधर्मेणापहृतेत्यर्थः राक्षसो युद्धहरणादिति याज्ञवल्क्यः गांधर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ मता स्मृ
विति स्मृतेः त्वया चैद्यो विप्रकृतो विप्रियं प्रापितः तथा हि वधूमूलस्य कृच्छ्रमूलस्य वैरतरोः स्त्रियो मूलं प्रधानं मूलं हि रूपकसंसृष्टोयम
र्थान्तरन्यासः सामान्येन विशेषस्य समर्थनरूपोर्थान्तरन्यासः ३८ अथ तेनापि त्वं विप्रकृत इत्याह त्वयीति त्वयि भूमेरपत्यं पुमान् भौमस्तं भौमं नर

त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ३८ त्वयि भौमं गते जेतुमरौत्सीत्स पु
रीमिमां प्रोषितार्यमणं मेरोरंधकारस्तटीमिव ३९ आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् कथापि खलु पापानामलमश्रेयसे यतः ४० पारम्

कासुरं जेतुं गते सति स चैद्य इमां पुरीं द्वारकां प्रोषितोऽर्यमा सूर्यो यस्यास्तां मेरोस्तटीमान्तु अंधकार इवारौत्सीत् रुद्धवान् ३९ हृषेरन्निटी[illegible]
अपकारान्तरमाह आलप्येति स चैद्यो बभ्रोर्यादवभेदस्य दारान् भार्याः भार्या जाया पुंभूम्नि दाराः स्यात्तु कुटुंबिनी इत्यमरः अपाहरत् इति यदिदं लिविहह्य[illegible]॥४८
दारापहरणमालप्यं वाच्यार्थालं नालपनीयमित्यर्थः अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वेति क्त्वाप्रत्यये समासे ल्यबादेशः यतः पापानां पापिनां क
थाकथनमुच्चारणमपि किंतिस्तिकथिकुंभिवर्चश्चेति ऽभ्यस्य अश्रेयसे ऽनर्थाय अलं समर्थः प्रभावक्तु नमः स्वस्ती स्वाहादिना चतुर्थी अ
त्र निषिध्यमानो लपनकार्यमश्रेयः प्राप्तिलक्षणेन तत्कारणालपनेनिषेधसमर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः ४० ॥

फलितमाह विराद्ध इति एवं भवता विराद्धो विप्रकृतो राधेरनिटः कर्मणि क्तः बहुधा नोऽस्माकं विरोद्धा विप्रकर्त्ता श्रुतश्रवा नाम हरेरपि
तृष्वसा तस्याः सुतः पैतृष्वस्त्रेयत्वात् सहजमित्रमपीति भावः स चैद्यः पूर्वोक्तान्यायक्रियया ऽरिर्निवर्त्यते कृत्रिमशत्रुः क्रियते अतो वलि
यस्त्वादनपेक्ष्य इति भावः ४१ अथाप्युपेक्षायां दोषमाह विधायेति येनरः पुमांसः स्युः पुमांसः पंचजनाः पुरुषाः पूरुषा नरः इत्यमरः
सामर्षे प्रागेव सरोषे शत्रौ वैरं अपकारं विधाय स्वयं चापकारं कृत्वेत्यर्थः उदासते उपेक्षन्ते ते नरः कक्षे गुल्मे कक्षस्तु गुल्मे जरात्पर्णास्य
दे तृण इति वैजयन्ती उदर्चिषम् अग्निं प्रक्षिप्य अभिमारुतं अभिमुखं मरुतीभावः शेरते स्वपन्ति तद्वन्नाशहेतुमित्यर्थः शीङः सार्व

विराद्ध एवं भवता विरोद्धा बहुधा च नः निर्वर्त्यतेऽरिः क्रियया स श्रुतश्रवसः सुतः ४१ विधाय वैरं सामर्षे नरोऽरौ य उदा
सते प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतं ४२ मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी क्रियासमभिहारेण
विराध्यन्तं क्षमेत कः ४३

तिरुडागमः अत्र ये उदासते शेरते इति विशिष्टोदासीनशयनयोर्वाक्यार्थयोर्निर्दिष्टकत्वासंभवा
त्ताद्रूप्यालक्षणयासत्वाभावबहुत्वसंबन्धे वाक्यार्थनिर्देशिरिति निदर्शनाभेदः न चायं दृष्टान्तो वाक्यार्थवाचभेदेन प्रतिविंबकरणा
क्षेपे तस्मात् स्पर्शनाश्रुतवाक्यार्थे वाक्यार्थसमारोपाद्वाक्यैकवाक्यतायां तद्भाव इत्यलंकारसर्वस्वकारः ४२ तथापि वसुत्वात्सो
ढव्य इत्याशंक्याह मनागिति यः क्षमी सहनशीलः शमित्यष्टाभ्यो घिनुणिति घिनुण्प्रत्ययः स सोऽकामं मनाग् अल्पं वा अभ्यावृत्त्या वा पीति
भावः अनभ्यावृत्त्या सकृद्वा अनल्पत्वेपीति भावः विराध्यन्तमपकुर्वाणं कामं क्षाम्यतु क्षमतां संभावनायां लोट् क्षमा सहिष्णानां दी
र्घः शमीनित्यदीर्घः क्रियासमभिहारेण पौनःपुन्येन वेत्यर्थः न तु पुंवाक्ये घने कार्थत्वं विराध्यन्तं कः क्षमेत न सहेत साक्षेपः शक्रुत्याम्नको

पं ३

रा॰म॰
७२

ननु सर्वदा क्षमैव पुंसो भूषणं मतो ऽपराधे क्षन्तव्यमत आह अन्यदेति । अन्यदा सुरतव्यतिरिक्ते काले योषितो लज्जेव पुंसो ऽन्यदा ऽपरि-
भवे क्षमा भूषणं परिभवे तु योषितः सुरते वैयात्यं धार्ष्ट्यमिव । धृष्टे धृष्णुर्वियातश्चेत्यमरः । पराक्रमः पौरुषं भूष्यते ऽनेनेति भूषणम् आ-
भरणं । एवं वाक्क्रियावचनत्वान्नियतलिङ्गत्वाद्द्विरावृत्तिर्न दोषः उक्तक्रमम् ॥४४॥ अथ परिभवे ऽप्यपराक्रमे त्रिभिर्निन्दामाह ।
माजीवन्निति । परस्यापकर्तुरवज्ञया यो ऽपमानेन यद्दुःखं तेन दग्धस्तप्तो ऽप्यत एव माजीवन्निति निर्गर्हितजीवी सन् माध्याङ्कोरो

अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ॥ पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥४४॥ माजीवन्यः प-
रावज्ञादुःखदग्धो ऽपि जीवति ॥ तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥४५॥ पादाहतं यदुत्थाय मू-
र्धानमधिरोहति ॥ स्वस्थादेवापमाने ऽपि देहिनस्तद्वरं रजः ॥४६॥ राधादामोदराभ्यां नमः ॥ ० ॥

इति लटः शत्रादेशः । जीवति प्राणान्धारयति । जनन्याः क्लेशकारिणो गर्भधारणप्रसवादिवेदनाकारिणः
तद्व्यतिरिक्ते ऽर्थे क्रियाहीनस्येत्यर्थः । तस्याजनिर्जननमनुत्पत्तिरेवास्तु जननीक्लेशनिवृत्त्यर्थमिति भावः ।
आक्रोशे नञ्यनिरिति नञ्पूर्वाज्जनिधातोरनिप्रत्ययः ॥४५॥ पादेति । यद्रजः पादेनाहतं सत् उत्थाय मूर्धानमारु-
ह्य गुरोः शिरो ऽधिरोहति तद्रजः अचेतनमपीति भावः । अपमाने सत्यपि स्वस्थात्संतुष्टाद्देहिनश्चेतनाद्वरं
० श्रेष्ठं व्यतिरेकालंकारः ॥४६॥ ० ॥

असंपादयत इति किंच जातिर्ब्राह्मणत्वादिः क्रिया गमनाध्ययनादिः गुणाः शौर्यादिः तैः साधनैः करणैरन्तर्नीया कंचिदर्थमुत्तमकी
र्त्यादिपुरुषार्थमन्यत्र गोत्वगमनपाकशौक्ल्यादिभिः स्वाभिधेयमुत्तैः करणैः कंचिदर्थं संज्ञानादिव्यवहाररूपं प्रयोजन
मसंपादयतः उभयत्र दृग्ज्ञानासाध्यसंभवादिति भावः पुंसो जन्म समालाभो यदृच्छाशब्दवदिच्छापरिकल्पितस्य ज्ञा
त्यादिसद्भावनिरपेक्षस्य डित्थादिशब्दस्येव न त्वन्यस्येवेति वा निशल्ययः स्वेच्छा यदृच्छा स्वच्छन्दः स्वैरितानेति ना मना
इति केचिद्वः संज्ञायै केवलं संज्ञार्थमेव स्वस्य कृत्यपरिभाषिकं किंचिन्नाममात्रमनुभवितुमन्यत्रानादेर्नानुभवितुमिति ॥ कु·५

असंपादयतः कंचिदर्थं जातिक्रियागुणैः ॥ यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम् ॥४७॥ तुंगत्व
मितरा नाद्रौ नेदं सिंधावगाधता ॥ अलंघनीयताहेतुरुभयं तन्मनस्विनि ॥४८॥ परमात्मने नमः

४७॥ स्वकृतमपोषं दृष्टं विलापोस्पष्टं भ्रूक्षयति तुंगत्वमिति अद्रौ तुंगत्वमौन्नत्यमस्तीति शेषः अस्तिर्भवतिपरो प्रयोज्य
मानोपि अस्तीत्यादि भाष्यात् वृत्तौ पूर्वाचार्याणां लटः संज्ञा इतरा चाऽगाधता नास्ति सिंधौ समुद्रे ऽगाधता गंभीरतास्ति
इदं तुंगत्वं नास्ति मनस्विनी धीरे तु अलंघनीयताहेतुरलंघ्यत्वकारणं तदुभयं तुंगत्वमगाधता चास्ति तस्मादद्रिसि
धुभ्यामधिको मनस्वीति भावः व्यतिरेकालंकारः ॥४८॥ ॥ रामचंद्राय नमः ॥ गुरुभ्यो नमः ॥ कृष्णाय नमः ॥ ॥ ६ रामः

संजनितश्चेत्तो मार्दवमनर्थायेत्याह तुल्यइति स्वर्भानुराहुः परार्धेऽपकारे तुल्येपि भानुमन्तं सूर्यं चिरेण ग्रसते हिमांशु
माशु ग्रसते पुनः पुनर्बाधत इति यत् ग्रसते गीर्णा विलम्बिधानात् तन्म्रदिम्नो मार्दवस्य फलं स्फुटं तस्माद्विपक्षेतीव्रे
ण भवितव्यमन्यथा मृदुः सर्वत्र बाध्यत इति भावः एतच्चाप्रस्तुतमार्केन्दुमथनेन सारूप्यात् गम्यते इत्यप्रस्तुतप्रशंसाभेदोयं
अप्रस्तुतस्य कथनेनो प्रस्तुतस्य गम्यते अप्रस्तुतप्रशंसा यां सारूप्यात् हि निबन्धितेति लक्षणात् ॥८८॥ एतदेवस्पष्टं पा
रान्तरेणाह स्वयमिति असाराणां दुर्बलानां निदर्शनं दृष्टान्तः अनस्ववईपदस्समासेन एवं बहुतृणं तृणकल्प इत्यर्थः ईषद

तुल्येपराधे स्वर्भानुर्भानुमन्तं चिरेण यत्। हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम्॥८९॥ स्वयं प्र
शामतेप्यपि परबाधावुपेयुषी। निदर्शनमसाराणां लघुर्बहुतृणं नरः॥९०॥ श्रीरामचंद्राय नमः ६९

थैकल्प प्रत्ययः विभाषासुपो बहुच् पुरस्तात् इति बहुच् प्रत्ययः प्रकृतेः पूर्वश्च भवति स्यादीषदसमाप्तौ बहुच् प्रकृतिलिंगताइ
ति वचनात् प्रकृतिलिंगता लघुर्निःपौरुषो नरोऽन्येपि परबाधुरिवेत्युपमितसमासः बहुतृणमिति स्यहेतोपमा साह
चर्यात्कल्पप्देश्यदेशीयरश्यादीनि इदं डिनाकल्प्यवादिनामौपम्यवाचकेष्वभिधानात् तस्मिन् उपेयुषी प्राप्तेसति
स्वयं प्रशामते स्वयमेव शष्ठू भवति कर्मवत्कर्मणा तुल्यक्रिय इति कर्मवाची यथाह कामंदकः यदा स्वमसंप्रशमं
निहंतुं पराक्रमाद्वर्जितमप्यमित्रम् तदाभियायादहितानि कुर्वन्नुपायतः कर्षणपीडनानि इति भावकर्मणोरित्या

त्मनेपदे· दुरहस्तुनसांयक्किरणाविनियक्तुनिषेधः वायुनातृणमिवाल्पीयसापिरिपुणालघुत्वेऽशेनपरिभूयतनइत्यर्थः उप
मालंकारः॥५०॥ पुनः पौरुषगुणमाह· तेजस्वीति· दवीयान्नतिदूरस्थोपि· स्थूलदूरेत्यादिना पूर्वस्यगुणादिपरलोपौ· तेज
स्विमध्ये तेजस्विनां मध्ये तेजस्वी गण्यते संख्यायते· तथाहि पंचाग्निभिःसाध्यं तपो यस्य तस्य पंचतपसः पंचाग्निमध्ये
तपस्यतस्तपनोऽर्को जातवेदसामग्नीनां पंचमः पंचानां पूरणः पंचमो जातवेदा भवतीत्यर्थः· विशेषेणसामान्यसम
र्थनरूपोर्थान्तरन्यासः॥५१॥ गुणान्तरं व्यतिरेकेणाह· अकृत्वेति· उच्चैरुन्नते ध्रुवि द्विषां मूर्द्धसु हेलया पादमकृत्वा

तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते॥ पंचमः पंचतपसस्तपनो जातवेदसाम्॥५१॥
अकृत्वा हेलया पादमुच्चैर्मूर्द्धसु विद्विषाम्॥ कथंकारमनालंबा कीर्तिर्द्यामधिरोहति॥५२॥

ऽनिधाय· अनपूर्वइतिनिषेधात्समासेपि न ल्यबादेशः· कीर्तिः कथंकारं कथमित्यर्थः· अन्यथैवंकथमित्थंसु सिद्धाप्रयोग
श्चेदित्यनर्थकाच्चकरोतेः कथंपूर्वात् णमुल्· अनालंबा निराधारा कीर्तिर्द्यां दिवमधिरोहति न कथंचिदित्यर्थः· किं
च· निःश्रेण्याद्युपक्रमेणाक्रम्योपरिसौधस्य दूरारोहत्वादिति भावः· तस्मात्कीर्तिसिद्धताः पौरुषमेवाश्रयणीयमिति
श्लोकतात्पर्यं· कीर्तितद्धेतोरभेदोत्समानकर्तृकता निर्वाहः· अत्राप्रस्तुतात्साः कीर्तेर्विषयणमहिम्नाऽप्रस्तुतप्रसादरो

ध पैरुपमेयोपमेसइत्यन्वयव्यतिरेकदृष्टान्तताव्याचष्टे· अंकेति· अंकमुत्संगमधिरोपितोमृगोयेनसचंद्रमामृगलांछनोमृगां
कोनिष्ठुरंयथातथाक्षिप्ताहतोमृगयूथोमृगसमूहोयेनसः केसरीसिंहोमृगाधिपः उभत्रापिव्याख्यायतइतिशेषः तस्मा
दुत्तौ मौर्दवं द्वःकौर्न्येयेयोरुपमेयुकौर्नयंइतिभावः अत्राप्यप्रस्तुतकथनात्प्रस्तुतार्थप्रतीतेरप्रस्तुतप्रशंसा ।।५३।। ननुसाम
दानादिसुकरोपायमुपेक्ष्याकिम्यासिकसिद्धिनादण्डेन· यथातथाह ननु· साम्नादानेनभेदेनसमस्तैरुतवापृथक् विजे

अंकाधिरोपितमृगश्चंद्रमा मृगलांछनः ।। केसरीनिष्ठुरक्षिप्तमृगयूथोमृगाधिपः ।। ५३ ।। छ
चतुर्थोपायसाध्येतुरिपौसांत्वमपक्रिया ।। स्वेद्यमामज्वरंप्राज्ञःकोंभसापरिषिंचति ।। ५४ ।।

तुंशक्यनेतारीन्न युद्धेनकदाचनेति तस्मात्सांत्वमेवायुक्तमित्याशंक्यदृष्टांतेनाचष्टे· चतुर्थेति· चतुर्थोपायसाध्ये दंड
साध्येरिपौसांत्वंसाम· सांत्वसामनुभेमेसइत्यमरः· अपक्रियाऽपकारः तथाहि स्वेद्यंस्वेदार्हं स्वेदैःप्रतिकार्यमित्यर्थः स्वे न४
दस्तुस्वेदनेघर्मइतिविश्वः· आमज्वरमपक्वज्वरंप्राज्ञः आमोरोगेरोगभेदेसामोपक्वेतुवाच्यवदितिविश्वः कोंऽभसा
परिषिंचतिनकोपीत्यर्थः· ज्वरितस्यांभःसेकवत्क्रुद्धस्यसांत्वमुद्दीपकंस्यात् अतोदंड एवेतिभावः वाक्यभे
देनप्रतिबिंबकरणापेक्षा· दृष्टान्तालंकारः ।।५४।। ५४ छ

सामेति· सकोपस्य रुष्टस्य वैरस्य तस्य वैरस्य सामवादाः प्रियोक्तयः सहसाऽकस्मात् प्रतप्तस्य क्वथितस्य सर्पिषो घृतस्य तो
यबिन्दव इव प्रत्युत वैपरीत्येन दीपकाः प्रज्वलनकारिणः न तु शान्तिकरा इति भावः तस्माद्रुष्टस्य समनुवचनं त्यज
रुष्टवैरिविषयक॥५५॥ एवं स्थितेषु केचित् दुर्वादयः प्रकाशयन्तीत्याह गुणानामिति गुणानां सन्ध्यादीनामा
यथातथ्यात् यथातत्त्वमनतिक्रम्य वर्त्तत इति यथातथं यथातथस्य भावो याथातथ्यमिति यावत् यथार्थत्वं तु यथातथमिति सव्ययी
भिसमासः यथार्थ इत्यव्ययीभावः स नपुंसकमिति नपुंसकत्वं ह्रस्वो नपुंसके प्रातिपदिकस्येति नपुंसकह्रस्वत्वं नतोन

सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः॥ प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः॥५५॥ ५५॥
गुणानामायथातथ्यादर्थं विप्लावयन्ति ये॥ अमात्यव्यंजना राज्ञां दूष्यास्ते शत्रुसंज्ञिताः॥५६॥

ञ्समासेनायथातथं तस्य भाव आयथातथ्यं ब्राह्मणादित्वात् ष्यञ् यथातथयथापुरयोः पर्यायेणेति विकल्पात् न ञ् पूर्वपदस्य वृद्धिः
तस्मादायथातथ्याद् यथार्थप्रयोगाद् असकाले प्रयोगादित्यर्थः ये अर्थं प्रयोजनं विप्लावयन्ति विघ्नन्ति कार्यहा
निं कुर्वन्तीत्यर्थः अमात्यानां व्यंजनं चिह्नं येषां ते न तथोक्ताः तद्वेषधारिण इत्यर्थः तद्गुणसंविज्ञानो बहुव्रीहिः अधिकरणो जन्मा
द्युत्तरपदे वा नतः वस्तुतस्तु शत्रुरिति संज्ञा येषां ते संज्ञिताः शत्रुसंज्ञिताः अत एव कूटमंत्रिणो राज्ञां दूष्याः तिरस्कार्या दू
ष्याग्रहोऽस्या इति यावत् राज्ञां नाकर्त्तरि चेति कर्त्तरि षष्ठी अतः स्वोक्तं न प्रतिरोद्धव्यमिति भावः॥५६॥ ७ ॥

ननु यानस्यापि काले यानमुक्तत्वात् संप्रत्ययमेव काल इत्याह स्वशक्तीति । केचिद्बुधाः स्वशक्त्युपचये सामर्थ्यातिरेके यानं यात्रामाहुः
यथाह कामन्दकः । आयेरास क्रोध्यसने ऽपूर्णा यानव्यमिसे वासमादिशन्ति । नचैवपक्षो व्यसनं स्यान्निष्टं श्वमनुसन्न्यभ्युदितोभिया
यादिति परे त्वन्ये बुधाः परस्य शत्रोर्व्यसने विपदि व्यसने विपदि भ्रंसइत्यमरः । यानमाहुः अत्र मनुः । नदायायाद्विगसेवव्यसने चोथि
ते ऽरिपोरिति त्वं संयुक्तपक्षद्वयं कर्तुं उदासीनमनुयोगि ईदासइति शानजाकारस्येकारादेशः । त्वामुत्थापयति प्रेरयति नव भय

स्वशक्त्युपचये केचित्परस्य व्यसने परे । यानमाहुरुदासीनं त्वामुत्थापयति हृदयम् ॥ ५७ ॥ लिलंघयि
षतो लोकानलंघ्यानलघीयसः ॥ यादवांभोनिधीन्रुन्धे वेलेव भवतः क्षमा ॥ ५८ ॥ ५८ ॥

ला मा दीहक्कालो न कदापि लभ्यत इति भावः ॥ ५७ ॥ नत्रस्वशक्त्युपचयतावद्दर्शनि । लिलंघयिषत इति । लोकांल्लंघयि
तुमिच्छतो लिलंघयिषतो लंघयतेस्सन्नन्ताच्छतृः । शतरि शस् अलंघ्यान्स्वयं दुर्लंघ्यान् कुतः अलघीयसो ऽतिगुरून् अत
एव यादवाम्भोनिधयः इत्युपमितसमासः । व्यासे वेलेवेति लिंगात् तान् यादवांभोनिधीन्भवतः क्षमा तितिक्षा वेले
वकूलमिव वेलाकूलेपि वारिधेरिति विश्वः रुंधे प्रतिबध्नाति अन्यथा प्रागेव सर्वं संहरेयुरिति भावः ॥ ५८ ॥ छ

मा॰टी॰ष्ठ ३६ अभ्युदयोऽयं पथ्यापमपरोपदत्र्लेक्ष्नोनैव नो विजयलाभ इत्याह· विजय इति· सेनाया विजयः कर्तृ· साक्षिमात्रे उदासीने एवं फल
भाजि त्वयि समीक्ष्योक्ते सांख्योक्ते आत्मनि बुद्धेर्महत्तत्त्वस्य मूलप्रकृतेः प्रथमविकारस्य कर्म भोगः सुखदुःखानुभव इवाप
कथ्यताम् दिश्यतां व्यवह्रियतां भृत्यजयपराजययोः स्वामिनिगमकत्वादिति भावः· सांख्या ह्याहुः· कर्तैव भवत्युदासीन इति सर्वत्र
लुपभोगं यस्मात्पुरुषस्य साधयति बुद्धिरिति च॥५८॥ अथ परस्य व्यसनमाह· हत इति· हिडिम्बरिपुणा भी

जनैरित्यस्य शेषः

विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्॥ फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि॥५८॥
हतेहिडिम्बरिपुणा राज्ञि द्वैमातुरे युधि॥ चिरस्य मित्रव्यसनी सुदमो दमघोषजः॥५९॥ ६७ ॥

मेन द्वयोर्मात्रोरपत्यं पुमान् द्वैमातुरः मातुरुत्संख्यासंभद्रपूर्वाया इत्यण्प्रत्ययः· उकारान्तश्च रेफपरत्वं· तस्मि
न्राज्ञि जरासंधे· संहिताभ्यां सपत्नीभ्यां मर्दितः· यस्तो जरया नाम पिशाच्या संहितस्तथेति कथयन्ति· युद्धे हते सति·
चिरस्याचिरकालेन· चिराय चिररात्राय चिरस्याद्याश्चिरार्थका इत्यमरः· मित्रव्यसनी मित्रभ्रंशवान् व्यसनं वि
पदि भ्रंश इत्यमरः· दमघोषाज्जातो दमघोषजश्चैद्यः· सुखेन दम्यत इति सुदमः· एकाकित्वात्सुसाध्य इत्यर्थः॥५९॥ रामः
१५

कथंचिदपेक्ष्य गम्यत्वपेक्ष्य यदिनोक्तः वस्तुतस्तु भूरामणामपि समपक्षस्य चेष्टः शास्त्रसंवादी यथाह कामंदकः परास्तमसत्त्वं प्रसभं निहन्तुं पराक्रमाद्दुर्जिनमप्यमित्रं नराभियायादहितानि कुर्वन्तु पानतः कर्षणायोडनानीत्यभिप्रेत्याह नीतिरिति परः शत्रुराय दि गम्यः इति नीतिर्यदप्यपदिशमनं मानिनः शौर्याभिमानवतः ह्रियै लज्जाकरमित्यर्थः किन्तु पूर्णो बलादिनाव्याप्तः सन् शत्रुस्त स्य मानिनो विधुन्तुदः पूर्णः सन् विधुं तुदति हिनस्तीति विधुन्तुदो राहुः विधुरूपोऽस्तु इति रवश्यस्य येनु मागमः नत्सोत्सवाय कीर्त्यै इत्यर्थः अतो बलिना बलवानेव यातव्यो बलिनश्च बध्यमितिभावः ॥ ८१ ॥ नर्हि पूर्वोक्त रामत्वादि शास्त्रविरोधः स्यादि

नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रियै ॥ विधुर्विधुंतुदस्येव पूर्णस्तस्योत्सवाय सः ॥ ८१ ॥ राम

अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् ॥ सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥ ८२ ॥ छ नारद

सामंक्याह अन्यदिति उच्छृङ्खलमनर्गलं प्रसत्य पीडनक्षमसत्त्वमिति यावत् सत्त्वं बलमन्यत् शास्त्रेण रामत्वादि शास्त्रेण नियन्त्रितमुदाहृतं परव्यसनकाले निर्मितं सत्त्वं बलमन्यत् उक्तलक्षणं वैलक्षण्यमन्यशब्दार्थः तयोस्सापेक्षस्वले निरपेक्षशब्दाभ्यां मिथो विरोधान्नैकशास्त्रार्थत्वं संभवतीत्यर्थः अत्र दृष्टान्तमाह हीति यस्मात्तेजस्तिमिरयोः समानमधि करणं ययोर्भावः सामानाधिकरण्यमेकाश्रयत्वं कुतः न कुत्रचित् संभवति तयोः सहावस्थानविरोधादिति भावः तस्मा

दुभयोरुदितानुदितहोमयोरिव शास्त्रार्थत्वादितरेतरं शास्त्रविरोधो न बाधक इति भावः ॥ ८२ ॥

तयो०

नार्हि किमिदानीं कार्यमत आह। इन्द्रप्रस्थेति इन्द्रप्रस्थस्य पार्थनगरस्य गमो गमनं स्वहृद्दर्शिनो गमस्थेति घञ्प्रत्ययः तावदिदा
नीं मा कारि तावन्न क्रियतामेवेत्यर्थः यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे इत्यमरः कर्मणि लुङ् माङि लुङि स्यादाशीरर्थे
न माङ्योगे इत्यडागमनिषेधः किन्तु चेदयश्चैद्यदेशा आस्माका इमे आस्माकाः युष्मदस्मदोरन्यतरस्यां खञ्चेति विकल्पादण् तस्मि
न्नणि च युष्माकास्माकाविति आस्माकादेशः ते दन्तिनस्तेषां सान्निधिरेव सान्निध्यं स्वार्थे ष्यञ् आस्माकानां दन्तिनां सान्निध्याद्धामनी
भूताः शाखाभङ्गादिकीभूताः भूरुहो वृक्षा येषां तेन तथोक्ताः सन्तु चेदियानेव क्लिपनामित्यर्थः अत्र च भूरुहां नागरत्नेनेव वस्तु कार्यमागम्य

इन्द्रप्रस्थगमस्तावत्कारि मा सन्तु चेदयः॥ आस्माकदन्तिसान्निध्याद्धामनीभूतभूरुहः॥ ८३॥ निरुद्धवीव
धासारप्रसरा गा इव व्रजम्॥ उपरुन्धन्तु दाशार्हाः पुरीं माहिष्मतीं द्विषः॥ ८४॥ रामचन्द्राय नमः॥ छ॥

नेशन्निति पर्यायोक्तालंकारः कारणं गम्यते यत्र प्रस्तुतात्कार्यवर्णनात् प्रस्तुतत्वेन संबन्धनात्पर्यायोक्तमुच्यते इति लक्षणात्॥ ८३॥
निरुद्धेति किं च दाशार्हा यादवाः वीवधो धान्यादिप्राप्तिः आसारः सुहृद्बलं प्रसारस्तृणकाष्ठादिसंवेशः धान्यादेर्वीवधः प्राप्तिरासा
रस्तु सुहृद्बलं प्रसारस्तृणकाष्ठादेरिति वैजयन्ती एते निरुद्धा येस्तेन तथोक्ता अन्यत्र निरुद्धो वीवधानां प्रत्याहारापरनाम्नां कं धवा
घासो यासाहरणसाधनं भारविशेषाणां आसारप्रसारो येषां प्रवेशनिर्गमौ येस्तेन तथोक्ताः विवधो वीवधो भारः प्रत्याहारकथने इ
ति हलायुधः व्रजं गोष्ठं व्रजः स्याद्गोकुले गोष्ठमिति वैजयन्ती गा इव माहिष्मतीं पुरीं द्विषोऽरीनुपरुन्धन्तु व्रजे गा इव माहिष्मसा

तर्हि पार्थप्रार्थनायाः का गतिरित्याशंक्योपेक्षैव गतिरित्याह यजतामिति पांडवो युधिष्ठिरो यजतां यागं करोतु इंद्रः स्वर्गमवतु रक्षतु इनोऽर्कस्तपतां प्रकाशयतां वयं द्विषतोऽरीन् हनाम मारयाम अहं न मन्ये पिबेत्याशयः सर्वत्र प्राप्तकाले लोट् तथा हि सर्वो जनः स्वार्थं स्वप्रयोजनं समीहते अनुसंधत्ते इन्द्रादि समानयोगक्षेमो नः साप्य इत्यर्थः अर्थान्तरन्यासः ॥८५॥ आप्यतामिति किंचिद्द्विषतां शिरश्छेदेन प्रोच्छलतो छलतोऽशोणितेनोक्षितैः सिक्तैः शस्त्रैरर्करोचिषां संपर्कात् संबंधाद्विधुना संपत् श्रीः

यजतां पांडवः स्वर्गमवत्विंद्रस्तपत्विनः ॥ वयं हनाम द्विषतः सर्वः स्वार्थं समीहते ॥८५॥ आप्यतां
विधुना संपत्संपर्कादर्करोचिषाम् ॥ शस्त्रैर्द्विषच्छिरश्छेदप्रोच्छलच्छोणितोक्षितैः ॥८६॥ इति
संरंभिणो वाणीर्बलस्यालेख्यदेवताः ॥ सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव ॥८७॥ ❀

आप्यतामिति निदर्शनालंकारः ॥८६॥ इतीति इतीत्थं संरंभिणः क्षुभितस्य बलस्य बलभद्रस्य वाणीः सरस्वतीः आलेख्यदेवताश्चित्रालिखितदेवताः सभायाः सदो गृहस्य भित्तीनां प्रतिध्वानैः प्रतिध्वनिव्याजेन सर्वतः भयादन्ववदन् अन्वमोदन्तेवेत्युत्प्रेक्षा ॥८७॥ श्रीकृष्णाय नौमि श्रीबालकृष्णपदवन्दे श्रीगोपीपतये नमः ॥८७॥ ❀

निशम्येति॰ अधः अक्षजमिन्द्रियजं ज्ञानं यस्य सोऽधोक्षजो हरिस्ताः शेषस्य शेषावतारस्य बलभद्रस्य याः गावो वाचः शेष
गवीः॰ गोरतद्धितलुकीति टच्॰ टिड्ढाणञिति ङीप्॰ निशम्य श्रुत्वा निशम्येति श्रवणे तथा निपातनं शमयतीति भट्टमल्लस्तन्न शा
म्यतेरिदं रूपम् अन्यथा निशमय्येति स्यात् अत एव आह वामनः॰ निशाम्य निशमय्य शब्दौ प्रकृतिभेदात् बृहतां वा
चां पत्युर्बृहस्पतेस्तस्य शिष्याय उद्धवायाभिधातुं वक्तुं दृशा दृष्ट्या प्रस्तावमवसरमदिशत् अतिदिष्टवान् प्रस्ता

निशाम्य ताः शेषगवीरभिधातुमधोक्षजः॥ शिष्याय बृहतां पत्युः प्रस्तावमदिशद् दृशा॥६८॥
भारतीमाहितभरामथानुद्धतमुद्धवः॥ तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजम्॥६९॥

वस्यादवसर इत्यमरः॥६८॥ भारतीमिति॰ अथ कृत्स्नाभ्यनुज्ञानन्तरं उद्धव आहितो भरोऽर्थगौरवं यस्यां सा तां तथ्यां
सत्यार्थां भारतीं वाचमनुद्धतमगर्वितं यथा तथा गदस्याग्रजं कृष्णं अग्रे पुरतः इति प्रगल्भोक्तिः उतथ्य
स्य महर्षेरनुजो बृहस्पतिः उतथ्यावरजो जीव इत्यमरः तद्वत् तेन तुल्यं जगाद तेन तुल्यं क्रिया चेद्वतिरिति वत्
निर्लक्षितः तद्धितगतेयमुपमा॥६९॥ ॥ ॥छ

रामः
१८

किंजगादेत्यत आह संगतीति संगतमितिमृणालपाणिनावलमङ्गेणकेवलश्रुतेणवेतिध्वनिः उक्तेसतिवक्रमसांगतम
युक्तं साधूक्तत्वात् अभ्यासस्समानयोगक्षेम असंगादितिचध्वनिः सांगतशब्दस्याहार्थत्वात्ननयोगेशाकश्रवेत्साहित्ता
तुमुन् तथाहि लेख्येनपत्रेणार्थेवाच्येनिकृरितेतिरीतिसतिवाचिकं व्यालार्थवाचसंदेशवचनमित्यर्थः संदेशवाग्वाचिकं
स्यादित्यमरः वाचोव्याहृतार्थायामितिठक् उक्तारवलुतवासंवल्वित्यर्थः खलुराद्यः सतिषेधेत्योवाक्यालंकारेनिषेधवाक्या
लंकारजिज्ञासानुनयेरवल्मभयत्राप्यमरः अलंखल्वोःप्रतिषेधयोःप्राचांक्त्वेतिक्त्वाप्रसमर इहनपादादौखल्वादपदेति

संगमसांगतंवक्रमुक्तंमृणालपाणिना ॥ निरूपितेर्थेलेखेनखलूक्ताखलुवाचिकम् ॥७०॥ तथा
२ त·स् पिययन्म्यपिनेगुरुहारित्सेवगौरवम् ॥ प्रयोजककर्तृत्वमुपैतिमममजल्पनं ॥७१॥ छ ॥ ७१ ॥

वेधस्योद्देजकापिप्रायार्थत्वात्तत्पर्यस्यखलुशब्दयोगेनद्युष्यतीत्यतसंधेयं लिखितार्थवाचिकमिवबलोक्तेमदुक्तिरत
वकाशेतिवाक्यार्थसतिविंवकरणात्स्पष्टतावद्दृष्टान्तः स्तुतिमाजेनतिंदावगमात्याजस्तुतिवचः तद्लक्षणंलगेवक्ष्यामः
॥००॥ तर्हित्तूष्णीभावेनस्थीयतांतेस्याह् तथापीति तथापिबलेनतिर्णीतेपितेतवमय्यपिबलमङ्कवदेवेत्सपेरर्थः गुरु
रित्सेवयद्गौरवमादरः तद्गौरवंममजल्पतोजल्पनेप्रयोज्यकर्तृमममद्धवप्रयोजककर्तृत्वंप्रेरकत्वमुपैतिअतोवक्ष्यामी
॥ छ ॥ सर्थः तर्हिपंडितैः सादरंपृष्टस्यविशेषज्ञस्यात्तवतूष्णीभावोऽयुक्तइतिभावः ॥७१॥ छ

मा.टी.द्वि. नन्वेवमेतेव सर्वं ग्रपंचोक्तं संगतिकिंते वाच्यमत्तीत्याहांव मिथ्या ग्रयं वोऽभिनिहितमिति धा पस्तु वन्निवाह वर्णैरिति व
.१९ र्णैरित्याद्विग्रयेणकतिपयैरेवपरिमितैरेव वर्णैः पंचाशद्वर्णमात्रकाक्षरैः कतिपयैरित्येव स्वरैर्निषादादिभिर्ग्रथितस्य
गुंफितस्य वाङ्मयस्य शब्दजालस्य ऐकार्थो निसमिति इत्थांतित्वार्थेमपद्गीयत इति गेयं तस्य गेयस्य गानस्येव वि
चित्रतानन्तभेदाऽनन्तरचनाभेदादपरिमिताभवंतीत्यर्थः अहो अनन्तेन नसाधुक्तोपि विशेषानंत्यान्नमापि वक्तव्यम

वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव॥ अनंता वाङ्मयस्याहो गेयस्येव विचित्रता॥ ७१॥
बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते॥ अनुज्झितार्थसंबंधः प्रबंधो दुरुदाहरः॥ ७२॥ ६॥

त्वीत्येकोभावः तस्य दुरुक्तत्वान्ममैवात्नीत्यर्थः ग्रस्य वयवमितो पासनादनेकैवेपक्षप्रमा॥ ७२॥ अथललितवच
नाधिक्षेपहारेणात्मन वनस्पमात्यत्वमाह बह्वपीति स्वेच्छयात्मप्रतिमानुसारेण प्रकीर्णमसंगतं बह्वपि कामं यथे
ष्टमभिधीयते किंतु अनुज्झितोऽर्थसंबंधः पदार्थसंगतिर्यस्मिन्स प्रबंधः संदर्भो दुरुदाहरो दुर्वचः इतरेतरस्व
रामेणानुसंगतमेवोक्तमिति स्तुतिः असंगतमेवोक्तमिति निंदा यावगम्यते॥ ७२॥ ७२॥ ६७॥ ६०॥ ॥ रामः १९

म्रदीयसीमिति· कुशलाः वक्तारो म्रदीयसीमतिकोमलां सुकुमारामृतां तथापि घनामर्थगुर्वीमनल्पमसांस्कृंकदलीदलकल्पां
२न पितर्थः अल्पैर्वर्णैर्गुम्फितैरेतोः श्लेषादिभिस्तंतुभिर्न्यकल्पितां रचितां गुरुकाव्यविशिष्टां शब्दादिविचित्ररूपां चित्रवर्णां रचनां पटीं
मष्टीमिव प्रसारयंति रामवाग्भिरेवं विधेतिस्तुतिः रामवाक्यमेवं विधेति निंदा चावगम्यते· अत्रश्लेषस्पष्टमुद्गिभयासंभवे
नसर्वोलंकारबाधकत्वाद्रुपमागतिर्भोभापितः सकृतागत्रश्लेषोयमित्यलंकारः एवं च पूर्णोपमाया निर्विषयत्वाप्रसंगा

म्रदीयसीमपि घनामनल्पगुणकल्पितामप्रविकासयंति कुशलाः स्वमंत्रावं पठीमिव ॥७४॥

विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः। हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा ॥७५॥ ६७

द्वेषमतिभोक्ष्यापि तेयतृपमेवेसन्ये ॥७४॥ अपोह्यः स्वसिद्धांतं वर्णयिष्यन्तुत्साग र्वं परिहरन्दूरमभिमुखीकरोति· विशे
षेति· विशेषं विद्वांस्तस्य विशेषविदुषो विशेषज्ञस्य· गम्यादिपाठाद्द्वितीयासमासः नवपुरोग्रे शास्त्रं नीतिशास्त्रं तदुद्ग्राह्य
ते उपन्यस्यते इति यत् उद्ग्राहितमुपन्यस्तमिति यैज प्रतीः छानुद्ग्राहणमित्यर्थः विधेयप्राधान्यात्स्त्रीलिंगत्वं वक्तुरुद्ग्राहयि
तुः परिचयस्थैर्ये अभ्यासदार्ढ्ये हेतुर्गुणनिका आम्रेडितं भाषामेवेति यावत् नतुवैदुष्यगर्वकृतमिति भावः ग्रहाभ्रेडने चोरा

मा॰टि॰ द्वि॰
२०

संगतिस्वमन्तमुपन्यस्यति · प्रज्ञेति · अतोऽस्मात्कारणात्स्वमस्यास्तीति स्वामी प्रभुः स्वामिन्नैश्वर्ये इति निपातनः प्रज्ञोत्साहौ मंत्रोत्साहश
क्ती आत्मनि स्वस्मिन्नाधातुं संपादयितुं यतेत स्वयमुभयशक्तिमान्भवेदित्यर्थः कुतः हि यस्मात्तौ प्रज्ञोत्साहौ उदेष्यंत्सा वक्ष्यें साजि
गीषोरात्मसंपदः प्रकृत्यात्मकै मूलं निदानं प्रज्ञोत्साहदृष्टान्तार्थं यथोत्साहस्तथा मंत्रोपि प्रज्ञा तौ न तु केवलोत्साह इति वल्लभदेवस्याप
वादः ॥७६॥ उत्साहवत्प्रज्ञापि प्रधानमुक्तं तस्याः प्रयोजनमाह सोपधानामिति · ये धीराः धीमन्तः सोपधानां सविशेषां युक्तियु
क्तामित्यर्थः अन्यत्र सगेन्दुकां सोपबर्हामित्यर्थः उपधानं विशेषः स्यादिन्दुके प्रणयेपि चेति विश्वः स्थेयसीं स्थिरतरां अचलां दृ

प्रज्ञोत्साहावतः स्वामी यतेताधातुमात्मनि । तौ हि मूलमुदेष्यन्त्या जिगीषोरात्मसंपदः ॥ ७६ ॥ सोपधा
नां धियं धीराः स्थेयसीं खट्वयन्ति ये । तत्रानिशं निषण्णास्ते जानते जातु न श्रमम् ॥ ७७ ॥ ६ ॥

ढां यसीं च · स्थिरस्य स्थादेशे यसुनि प्रियस्थिरेत्यादिना स्थादेशः · धियं खट्वयन्ति · पर्यङ्कं कुर्वन्ति साश्रयन्तीत्यर्थः · शयनं मंचपर्य
कपल्यंकाः खट्वया समा इत्यमरः · तत्करोति तदाचष्टे इति णिच् · ते धीरास्तत्र धीखट्वायां अनिशं अश्रान्तं निषण्णाः विश्रान्ताः सन्तो
जातु कदाचिदपि श्रमं खेदं न जानते नाविदन्ति · श्रमं खेदो ध्वरसादेरिति लक्षणं · धीपूर्वक एवोत्साहः सफलो न तु केवल सर्वथा धी
रः प्रयत्नीयेत्यर्थः अत्र धिया आरोप्यमाणे या प्रकृतमापोपयुक्तरूपो यकारपर्यन्तत्वया परिणामालंकारः आरोप्यमाणस्य प्रकृतोप
रामः
२०

४८ अंप्रज्ञाप्रज्ञयोर्द्वाभ्यां वैषम्यमाह स्पृशन्तीति तीक्ष्णाः निशितप्रज्ञाः खरवच्छरेण तुल्यं स्तोकमल्पमेव स्पृशन्ति अतः कार्यस्याभ्य
न्तरं विशंति अल्पायासेन बहु कार्यं साधयन्तीत्यर्थः बहु स्पृशापि अपि नाम स्थूलेन मंदेन बहुना यावन्मनायं श्रीफलेन तुल्यमश्मवत् ते
न तुल्यं क्रिया बहुलीतः बहिरेव च कार्याकार्यस्येति भावः स्थीयते स्थितिः क्रियते मूढो हि अल्पस्य हेतोर्बहु प्रसयत्यल्पं भूषकमपहृणा
यशिरवशिवनन वसरि हासास्पदं भवतीति भावः तद्विजगते यमुपमा॥७८॥ आरंभंत इति किंच अज्ञा अल्पं तुच्छमेवार्थमा

स्पृशन्ति शरवत्तीक्ष्णाः स्तोकमंतर्विशन्ति च॥ बहुस्पृशापि स्थूलेन स्थीयते बहिरश्मवत्॥७८॥
आरंभन्तेल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च॥ महारंभाः कृतधियस्तिष्ठन्ति च निराकुलाः॥७९॥

रभंते काममत्यन्तं व्यग्रास्त्वरिताश्च भवन्ति न च पारं गच्छन्तीति भावः कृतधियः शिक्षितबुद्धयस्तु महारंभा महोद्योगा भ
वंति निराकुला अव्यग्राश्च तिष्ठन्ति भवन्ति पारं गच्छन्तीति भावः॥७९॥ अथ प्रज्ञावानपि न प्रमाद्येत्याह उपायमिति उ
पायमास्थितस्यापि अस्याप्युपायेनैव कार्यं साधयतोपीत्यर्थः किं तन्मयमनये इति भावः प्रमाद्यतोऽनवधानस्य प्रमादेनाव
८ धानेस्मनः अर्थाः प्रयोजनानि निवर्तन्ति नयादि शयालु निशालु आलुरुशीलेऽर्थे हारामभाजुरु मृगान्यातीति मृगयु

श्रीधरः दृगश्वयश्चे सोपारिकः प्रसर्पणे निपातः आधोरणव्याधजीवो मृगयुर्लुब्धकोऽपि स इत्यमरः उपशेरतेऽस्मिन्निति उ
पशायः मार्गस्थानितो व्याधस्यान्तर्गुप्तिस्थानं भक्तविशेषः एरजिसमासयः नत्रजिष्ठतीति उपशायस्थोऽपि मृगान्न हन्ति विशेष
णसामान्यसमर्थनरूपोऽर्थान्तरन्यासः॥८५॥ एवं प्रज्ञाया आवश्यकत्वमुक्तमथोत्साहस्याप्याह उदेतुमिति जेतुमिच्छुः जिगी
षुरेकवद्वादशस्वपि राजसु मध्येष्वादित्यादिसेषु दिनकृद्योद्दिनकरो व्याप्रियमाणे आदित्यस्त्वेहामुत्साहधमसत्यजंप्रयुंजन
एव न तु निरुद्योग इति भावः उदेतुं कल्पते उद्घाय प्रभवति उत्साहशक्तिरेव प्रभुशक्तेरपमूल इत्यर्थः नानालिंगत्वादत्र

उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः॥ हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान्॥८५॥
उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि॥ जिगीषुरेको दिनकृदादित्येष्विव कल्पते॥८६॥ ४

नोऽनन्तार्यत्वमिति निर्मुक्तेः प्रतिमासादित्यभेदाद्वादशत्वं नचैकस्यैव द्वादशात्मत्वं द्वादशात्मा दिवाकर इत्यभिधानान्नैवान्तेवा
र्थमाद्यः पुराणोक्ताद्रष्टव्याः राजानस्तु अरिर्मित्रमरेर्मित्रंमतः परं तथारिमित्रमित्रं च विजिगीषोः पुरःसराः पञ्चैते निशे
षः पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरं आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः पार्ष्णिग्राहासारआक्रंदाश्चेत्यर्थः
अत्र चत्वार इति शेषः एवं नव भवन्ति विजिगीषुर्दशमः अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः अनुग्रहे संहतयोः

समर्थोऽसंहतयोर्वधे मंडलाद्बहिरेतेषामुदासीनो बलाधिकः अनुग्रहे संहतानां च वधे प्रभुः

इति मध्यमोदासीनाभ्यां सहद्वादश वेदितव्याः पूर्णोपमा ॥८६॥ ॥ ४

विगृहीतयो

उपायमास्थितेसत्रराजाऽप्रमाद्येत् क्रमप्रमादप्रकारमाह वृद्धिरिति वृद्धिरेवशस्त्रंयस्यसः वृद्धिशस्त्रः अमोघधारणात्वात्तस्मा
इतिभावः प्रकृतयः स्वाम्यमात्यादि राज्यांगानिप्रकृतयइत्यमरः ताएवाङ्गानिगात्राणियस्यसप्रकृत्यंगः गजैकल्पेराज्ञोवैक
ल्यस्यादितिभावः धनाद्युभेदासंवृतिर्मंत्रगुप्तिरेवकंचुकः कवचोयस्यसः अत्रभेदेनज्ञभेदादितिभावः चरतीति चरः पचाद्यच्
सएववारीश्च ठपुरुषः अज्ञादित्वात्स्वार्थिकोऽण् अत्रसमयः वारस्त्रमूठपुरुषइत्यमरः सएवेक्षणंचक्षुर्यस्यसः अन्यथास्व
रमंडलवृत्तीनामदर्शनादंधस्येवराज्ञः पदेपदेनियातइतिभावः स्यात्सन्देशहरोदूतइत्यमरः दूतएवमुखंयस्येवाक्यसः दू

वृद्धिशस्त्रः प्रकृत्यंगो धनसंवृतिकञ्चुकः। वारेक्षणो दूतमुखः पुरुषः कोपि पार्थिवः ॥८२॥ ७

तमुखः अन्यथा मूकस्येववाग्व्यवहारासिद्धेत्संधाद्यादिकार्येष्वनिर्वंधः स्यादितिभावः एवंभूतः पार्थिवः कोपिपुरुषो
न्यएवायंलोकविलक्षणपुमानित्यर्थः अनेनराज्ञादिव्यपुरुषादिसंपन्नेनभवितव्यः एतदेवाप्रमत्तत्वम् अन्यथास्व
रूपहानिस्यादितिभावः अत्रकोपिशब्दोलोकसंबंधोप्यसंबंधोक्तातद्रूपातिशयोक्तिः सावृद्धिशस्त्रइत्यादिरूप
कानिमूठेतितेनः संगांगिभावेनसंकरः ॥८२॥ रामायनमः कृष्णायनमः गुरवेनमः सरस्वत्यैनमः ॥८२ ८२ ॥

मा·टी·द्वि· २२

वस्तुर्थोपायसाध्यइत्यादिनायदुक्तंसाध्यमेवकर्तव्यमितितत्रोत्तरमाह तेजस्वीति· कालेजानातीतिकालज्ञः अस्यार्थः कालइति वि
दुषइत्यर्थः आतोनुपसर्गेकः नतु इगुपधेत्यादिनाकः विधेः समासेकर्मोपपदस्यैव बलवत्वभावणान्तस्यमहीपतेस्तेजः क्षमेवेति
वारकान्तोनियमोनास्ति किन्तु यथाकालमुपययथाश्मपणीपतीत्यर्थः तथाहिस्त्रोछंदसा रुद्धीन्यायानिर्वेदादीन्यथोनि यलस्यभा
वस्तरूपं संज्ञातायतंकवेः कस्तुकेः केवलमोजः प्रोल्लसत्बंधलंया एकगमादः सुकुमारत्वं धत्ववानकिन्तुन दूसानुगुण्येनयथापो
गमनुभयमनुपादेयमितिदिष्टान्तालंकारः ॥ ७२ ॥ यदुक्तं क्रियासमभिहारेणाविराम अनंतं क्षमेतन दूयतिनत्रोत्तरमाह क्षतापचारेदु

तेजः क्षमावानैकान्तः कालज्ञस्य महीपतेः ॥ नैकमोजः प्रसादोवारसभावविदः कवेः ॥ ७३ ॥ क्षतापचारोपिपरै
क्ष्मा· रनाविष्कृतविक्रियः ॥ असाध्यः कुरुतेकोपं प्राप्ते कालेगदोयथा ॥ ७४ ॥ वासुदेवनीतिः ॥ ७४ ७४ ॥

ति· पटैःशत्रुभिः कृतः अपचारोऽपकारो यस्यसः तथोक्तः तथापिअनाविष्कृतविक्रियोनाविष्कृतोविकारोयेनएवंभूतःसाध्येर्ग
न्निसमाधेयः सन् गदोपथारोगस्तु खलबलयथाश्वकरोति तद्वत्· कालेबलक्षयावसरप्राप्तेसतिकोपंकुरुतेशक्तत्वे सतीत्यर्थः न
दुक्तं वहेदमित्रं स्कंधेनयावत्कालविपर्ययः अथैनमागतेकालेभिंद्याद्घटमिवाश्मनीति ॥ ७४ ॥ छ ॥ ७४ ७४ ॥ स्कं: २२

स्तस्येदानीं शांतत्वमित्याद्दिनाह मृद्विति॰ मृदुवन्तु नाम अवहितमनं नाहितं तेजोऽर्थान्भोक्तुं प्रकल्पते समर्थं भवति तथाहि प्रदीपो
भ्यन्तरस्थयान्तःस्थया दशया वर्त्या स्नेहं तैलादिकमादत्ते॰ अन्यथा स्वयमेव निर्वायादिति॰ तत्र शान्तिपूर्वमेव क्षात्रं पर
लतीति सर्वथा प्रथमतः क्षमामिति भावः दृशावर्त्तिरवस्थायां स्नेहं तैलादिकं रसं इति विग्रहः॰ विशेषणसामान्यसम
र्थनादर्थान्तरन्यासः ॥ ८५ ॥ तर्हि पौरुषं माभून्निसंक्षमप्रमाणस्य दैवमेव श्रेयो विधास्यतीत्याशंक्याह नालंबत इति॰ विद्वान्
नीतिज्ञः दिष्टमस्तीति मतिरस्य दैष्टिकः दैवप्रमाणिकः तस्य भावः दैष्टिकतां भागधेयमित्यमरः अस्ति नास्ति दिष्टमिति ठक् तत्र

मृदुव्यवहितं तेजो भोक्तुमर्थान्प्रकल्पते॰ ॥ प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया॰ ॥ ८५ ॥ नालंबते दैष्टि
कतां न निषीदति पौरुषे॰ ॥ शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥ ८६ ॥ ८६ ८६ ॥ छ

व दैष्टिकतामेव नालंबते सर्वथा यत्नरहितस्य विनाशादिति भावः तथा पौरुषे केवलपौरुषकारेऽपि कुवादित्वात्प्रस
ङ्गः न निषीदति नातिष्ठति॰ दैवप्रातिकूल्ये तस्य वैफल्यादिति भावः किंतु सत्कविः सम्यगपि नाम शब्दार्थाविव तयोः काव्यशरी
रत्वादिति भावः यथाह वामनः॥ अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यमिति द्वयं दैवपौरुषं चापेक्षते अतः पौरुषमप्याव

अथ स्थाने फलमाह स्थायिन इति। रस्यते स्वाद्यत इति रसस्तत्त्वं गमयति रसतेः स्वादनार्थत्वाद्रस्यं नयतीति रसास्ते इति निर्वचनात्तत्
स्य रसस्य रसान्तरतः स्थायिनः स्थायिभावस्य रसादेरन्यः। रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा जुगुप्सा विस्मयशमाः
स्थायी भावाः। ... तस्यैकस्यैकार्थस्यानुभावरूपे प्रयोजने भूयांसः। संचारिणो व्यभिचारिणो निर्वेदादयः। वि
भावादीनामुपलक्षणमेतद्यथा प्रवर्तन्ते। ... विभावैरनुभावैर्व्यक्तास्तिके व्यभिचारिभिः आनीयमानत्वात् स्थायी भावो
रसत्वं नयति। ... स्थायिनः स्थिरस्य संसारकालं गतौ समारोपसर्गः। तस्यैकस्य जिगीषोर्नायकस्यार्थे प्रयोजने भूयांसो महीं

स्थायिनोऽर्थे प्रवर्तन्ते भावाः संचारिणो यथा। रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः॥ ८७॥ तन्त्रावापवि
दा योगैर्मण्डलान्यधितिष्ठता। सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः॥ ८८॥ ॥ महीभृतो राजानः प्रवर्तन्ते स्वय
मेवास्य कार्यं साधयन्तः ... भजन्तः स्वस्थमिति भावः। केचित्तु भावपदस्यापि सपरत्वमाश्रित्य यथा संचारिणो भसंगास्तगंतु
का अन्ये रसाः स्थायिनः स्थिरस्यैकस्य ... तस्यैकरसस्यार्थे प्रवर्तन्ते। यथा अङ्गिन्येव कार्येऽपि शृङ्गारादय इति व्याचक्षते। सोऽ
यमलंकारः॥ ८७॥ शान्तिपक्षस्य वचनानन्तरं मोहं ... मंत्रावापौ स्वपरराष्ट्रचिन्तने। तन्त्रमावापो शास्त्रे। यथा प्रयोगं च
वेत्तीति तन्त्रावापवित् मंत्रान्तरास्तु चिन्तयामावापः परचिन्तनं शास्त्रोपधानम् ... तन्त्रामीति वैजयन्ती। योगैः सामाद्युपायैः
... निग्रहा सुखेन ग्राह्याः ... श्लेषानुप्राणित उपमेयमितिकेचित्॥ ८८॥ ८८॥ ❀ ❀ ❀ ❀

प्रज्ञोत्साहावतः स्वामी स्वैवाधत्ते प्रभुशक्तेर्मूलमित्युक्तं न देवप्रनाक्ति· करोति उत्तुंगो महोन्नतः प्रज्ञाबलं मंत्रशक्तिरेव बृहत्
प्रधानं मूलं यस्य सः उत्साहस्व पादपः करेणावलिना प्रचयेन वर्द्धनीयां प्राच थलि हस्ताश्वः करा गतिनः प्रथीयसी
पृथुतरां कुत्तो हलादेर्लघोतिमिरे फादेः प्रभुशक्तिस्लेओ विशेषांसगमाप· प्रभावस्य प्रतेजः कोशदण्डजमित्यमरः फल
निष्पन्नयते फलनिष्पत्तौ त्यनः मंत्रपूर्वक एवोत्साहस्तु फलति मनो विपरीतम्लोर्ध्वस्वस्वअध्यमानि भावः रूपकालंकारः।

करप्रचयोत्तुंगः प्रभुशक्ती प्रथीयसीम्॥ प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः॥८९॥ ६७
अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरे स्वराः॥ विजिगीषोर्नृपतयः प्रयान्ति परिवारताम्॥९०॥

९०॥ विनष्यकारिणस्तु विषम पिविधेयं स्यादिति नयेणाह अनल्पत्वादिति· अनल्पत्वात्सहोत्साहाधिकका
लाभिज्ञत्वात् अनल्पक प्रधानत्वात्मंडलाभिज्ञत्वात् अल्पमानत्वात्प्रधानत्वात्नायकत्वात्सांश्ववंशस्य वंशवाद्यस्व
स्येतरादीणागाणादिश्वस्स्व अथवायत्वाद्वंसरवंवंशस्तत्कालविहितस्वरउच्यते तस्येतरे स्वराः रंडजानयइव
विजिगीषोर्नृपतयोऽन्ये मंडलपरिवर्तिनो राजानः परिवारतां योध्यतां प्रयान्ति· न तु कार्यं साधयन्तीत्यर्थः तस्मात्क्लिष्टप

॥ ६७ ॥

मा॰ टी॰ द्वि॰

२५

भवतीति । किंच अनारम्भमाणस्य स्वयमपि किंचिदकुर्वाणस्यापि विभोर्व्यापकस्य च परैरन्यैरुत्पादिभिः शंखभेर्यादिस्य ग्रै माहिताः संपादिता अर्थाः प्रयोजनानि विहायस आकाशस्य शब्दा इव गुणतां विशेषणतां कारणाद्भुक्तगुणत्वं व्रजन्ति । शब्दो हि गुणः स्वयं तूदासीनस्याकाशस्य महिमैव कार्यदेशं सापूर्वकं स्या नियमसर्वार्थाविपि स्वकीयतां नयन्ती सर्वगुणत्वाप्तिः शब्दादिरवोद्धृताविरस्य तत्तद्धिनि प्रजयन्तो ॥९१॥ यातव्येति । किंच एकार्थमेकप्रयोजनं सत्रमेव तन्तुः सूत्रं तत्र प्रोतायां स्यूतायां गुणस्कोऽभीष्टामिलाभिष्याभिलम्भः प्रपूर्वाद्धेनः कर्मणि क्तः । यातव्यपार्ष्णिसाहित्यासंग्रसारणम् । यातव्योऽभिषेणयि

अप्यनारभमाणस्य विभोरुत्पादिनः परैः ॥ व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः ॥ ९१ ॥ यातव्य
पार्ष्णिग्राहादिमालायामधिकद्युतिः ॥ एकार्थतन्तुप्रोतायां नायको नायकायते ॥ ९२ ॥ ९२ ॥ ६

तव्योऽरिः पार्ष्णिं गृह्णातीति पार्ष्णिग्राहः पृष्ठतो धावी कर्मण्यण् तावादौ येषां ते पूर्वोक्ताः पंक्तिस्थिता एव माला कारत्वमाला तस्यामधिकद्युतिर्यस्य सः । प्रतापतेजा नायकः शक्तिसंपन्नो जिगीषुर्नायकायते मध्यमणिरिवाचरति स्वयमेव सर्वोत्कर्षेण वर्तत इत्यर्थः । तस्मादिमत्रपक्षनर्थमिति भावः । नायको नेता मध्यमणिश्च मध्यमणावपीति विश्वः । उपमानाद्वाचारे इति क्यङ् । अत्र स्तावधातुकर्मणि दीर्घः । नायकायत इत्युपमा । अत्र यात्रासनाविरोधात् । एकार्थतन्तुसंवेतिरूपलोधिषाननिरोपाने नारोप्यमाण तंतुलसैवे

एमः

२६

अथविमृश्यप्रकरणप्रकारमाह · षाड्गुण्यमिति · शक्तिप्रभावादित्रयं · बलं वापेक्षत इति शक्त्यपेक्षः सन् · पवाधव् · शक्तिर्बलेन
भावाः शक्यन्ते · षड्गुणा एव षाड्गुण्यं संधिविग्रहादि षट्कं वा तु र्वर्गादौ हिसात्त्वार्थे व्यञ्ज नदेव रसायनमौषधविशेष
उपयुंजीत सेवेत · रसायनं विहंगोपिजराद्य अभिदौषधहन्ति विघ्नः । एवं सत्यस्य त्रयो गुणाः रंगानि त्यागादीनि · स्वामी जनपदो मात्याः को
शो दुर्गम्बलं सुहृत् राज्यं सप्तस्वरूपं नीतिज्ञाः सं प्रसक्षत इत्यभिधानात् · गात्राणि वस्याः भुनि स्थिराणि कालान्तरक्षमाणि स
र्वः ग्लानि स्थम्यतः । वलवन्ति च परपीडाक्षमाणि च भवन्ति श्लिष्टपरं परिजरूपकम् ॥ २३ ॥ स्थानेति · किञ्च स्थानेशाल्पविषये

षाड्गुण्यमुपयुंजीत शक्त्यपेक्षी रसायनम् ॥ भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च ॥ २३ ॥ स्थाने शमवतां
शस्ता व्यायामेष्विव रंगिणाम् ॥ अयथाबलमारम्भो निदानं क्षयसम्पदः ॥ २४ ॥ श्री श्री श्री ॥ २४ ॥

शमवतां क्षमावतामंगिनां राज्ञां शरीरिणां च शक्त्याः प्रभावाधनुसारेण बलानुसारेण व्यायामे व्यापारे षाड्गुण्यप्रयोगे गमना
दौ च सतीत्यर्थः · इह श्लिष्टपदः राज्यस्य शरीरस्य चेति भावः । विपक्षे बाधकमाह अयथावलमिति क्रमेण · यथासाध्यमिति सर्व्व्यी
भावेन समासः । आरंभो व्यायामः क्षयसंपदो भवन्ति निदानमादिकारणम् अंगानामिति शेषः · तस्मात् सात्म्यस्मात्स्वैरणे स्वकं र
न न श्रेयस्करमिति भावः । अत्र विरोधस्यापि प्रक्षिप्तत्वात् द्वयं राक्षि न लौवक्तुनावक्तव्यमिति । ततो ध्यानामंगानामौपम्यं च गम्यते इति

मा॰ टी॰ २ कालिनमाह । नेति । नतस्माद्वाक्यार्थस्याकार्यत्वात्तं चेदिनाम्नो शिशुपालं भवान्मावमंस्त नावमन्यस्व मन्यतेर्माङि
२५ लुङ् । अनुदात्तत्वान्नेडागमः । कुतः यस्मादयमुदात्तस्वरान्निवर्तते शिलोदात्तानिवारी नेकपदे । एकस्मिन्पदे न्यासे अनुदात्तो लक्षणा
च निहन्ति हिनस्ति नीचैः करोति च अनिश्चरादुदात्तमेकं पदमेकवर्जमिति परिभाषाबलादित्यर्थः ॥ ९५ ॥ नवाद्यमेकाकी कि
न्तु करिष्यतीत्याशंक्याह मावेदीति असौ चेदिराट् एकः स्वयं एकाकी । अतो जेतव्यः । दुर्जय इति मावेदि मा ज्ञासि । विदेर्लुङ्

नदी शिलारं चेदीनां भवान्मावमंस्त मा ॥ निहन्त्यरीनेकपदे य उदात्तः स्वरानिव ॥ ९५ ॥ मावेदि यदसा
वेको जेतव्यश्चेदिराडिति ॥ राजयक्ष्मेव रोगाणां समूहः स महीभृताम् ॥ ९६ ॥ ९६ ॥ ६७

मेदिनीमा ङि लुङ् रूपं यस्मात्स चेदिराट् राज्ञश्चं रूपयक्ष्मा राजा चासौ यक्ष्मा चेति वा क्षयरोगो रोगाणां निवमहीभृतो
समूहः समाहितरूपः । तथाहुर्वाग्भटः । अनेकरोगानुगतो बहुरोगपुरोगमः । राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः ॥ न स
वारणो हि ज्ञातीनां च राजा न्ध स्वयं पुरः पक्षो राजयक्ष्मा रोगाणामिव नतो नमन इति । अतो दुर्जय इत्यभिप्रायः । एतेन चिरस्थायित्वम
सतो दुरन्तमोऽन्यघोषजडत्वादिति निरस्तम् ॥ ९६ ॥ राम
२५

अथास्य सर्वराजसमष्टितानेव द्वाभ्यां व्याचष्टे· संपादितेति· संपादितं फलं लाभो बाणाग्रं च येन स तथोक्तः फलं लाभ इषुराग्रयो रिति श्ना
श्वतः सपक्षः सुहृत्कं कादिपत्रक्षकश्च परेषां भेदनः शत्रुविदारणः बाणो वा गाढगुणः शौर्यादिना ज्यया च गुणवता धिङ्क्ये
न वचनेन वैध्येन कर्मणेप्रभवतीति कार्मुकं धनुः कर्मण उकञ् तेनैव संधानं संधिमेष्यति अतो नेकाकीति भावः अत्राप्युपमाश्लेषो
पमानभेदात्॥९७॥ ये चेति· किं च अन्ये च कालयवनशाल्वरुक्मिद्रुमादयो राजानस्तमः स्वभावास्तमोगुणात्मकाः अत एव ते

संपादितफलस्तेन सपक्षः परभेदकः॥ कार्मुकेनेव गुणिना बाणः संधानमेष्यति·॥९७॥ ये चान्ये
कालयवनशाल्वरुक्मिद्रुमादयः॥ तमःस्वभावास्तेप्येनं प्रदोषमनुयायिनः॥९८॥९८ ९८॥ छ पा.स्

पि प्रदोषं प्रकृष्टदोषं तामसमेवैनं चैद्यमनुयायिनः अनुयास्यन्तः स्वाद्रूपादिति भावः भविष्यति गम्यादय इति णि
निः॥ भविष्यदर्थे अकेनोर्भविष्यदाधमर्ण्ययो रिति षष्ठी प्रतिषेधात् द्वितीया· यथा ध्वान्तं रजनीमुखमनुपपातीति तद्वदि
ति वस्तुनालंकारध्वनिः· रागौ ध्वान्ते गुणेन महत्समरागद्वेषौ दुष्टराज्यंशा यातीति वैजयन्ती॥९८॥ ९९ ९९॥

ननुवाणादयोस्माभिरिदानींकृतसंधानानविरोधमीयुरित्यत आह उपेति· तेनचैद्येनकृतो ऽल्पोप्युपजापोभेदः·भेदोपजापा
वित्यमरः। त्वय्याकोपवतः· सकोपवतस्तान्वाणादीन् अनिलः साग्नीनेधानिव काष्ठंदार्विन्धनंत्वेधइध्ममेधःसमित्
स्त्रियामित्यमरः। आशुदीपयितासद्यः प्रज्वलयिष्यति·दीपेर्ण्यन्तात्तृच्· अन्नवैराणः संहिताआपदिसानिरंध्रेसद्यः गवेष्यं
मीतिभावः।। ९९।। ननुकिमतत्राह बृहदिति· बृहत्सहायोमहासहायवान् क्षोदीयान् क्षुद्रतरोपि· स्थूलदूरेत्यादि

उपजापंकृतस्तेन तानाकोपवतस्त्वयि ।। आशुदीपयितास्पोपिसाग्नीनेधानिवानिलः ।।९९।।
बृहत्सहायः कार्यान्तंक्षोदीयानपिगच्छति ।।संभूयांभोधिमभ्येतिमहानद्यानगापगा ।।१००।।

८ नायणादिपरलोपः। पूर्वगुणश्च· कार्यस्यान्तंपारंगच्छतीति· तथाहि· अपांसमूहः आपं· तस्यसमूह इत्यण्· तेनगच्छ
तिसापगा गिरिसंबंधिनीनदी गिरिनदी महानद्यागंगादिकयासंभूयमिलित्वांभोधिमभ्येति· क्षुद्रोप्येवंतादृशेन दृक्
महताश्रयसंपन्नःकिंतुवक्तव्यमित्यपिशब्दार्थः। विशेषणसामान्यसमर्थनरूपोर्थान्तरन्यासः।।१००।। भाभीभी: उत्तः
२६

किंच न केवलं तत्रावसाध्यत्वं मित्रविरोधश्चाधिकोनर्थ इत्याह तस्मेत्यादिह्येन ये चनस्य चैद्यस्यामित्राणि तपायेच्चनेनवामित्रान्नृपा
लदुभये त्वयाभियुक्तमभियातं येनं चैद्यं गन्तारो गमिष्यन्ति गमःकर्त्तरि लुट् अतःपरे उक्तो भयमप्तिदिक्लोस्तवमित्राणितस्यामित्रसं
त्यां गन्तार इति ॥१०१॥ ननुः किमनेनाह मखेति इत्थमनेन प्रकारेण इदमस्य जगत्तिष्ठति स्थमुत्थाप्य मखविघ्नाय यज्ञविघाताय सम
कलं राजकं राजसमूहं गोत्रोक्षोष्ट्रोरभ्रराजेत्यादिना वुञ् तस्याप्यपक्षोभिपिला हन्त भजातारेरजातशत्रोर्युधिष्ठिरस्य त्वया प्र

तस्मिन्मित्रायमित्रास्ते ये च ये चोभये नृपाः॥ अभियुक्तं त्वयैनं ते गन्तारस्त्वामतः परे॥१०१॥ मखविघ्नाय
सकलमित्थमुत्थाप्य राजकम्॥ हन्त जातमजातारेः प्रथमेन त्वयारिणा॥१०२॥ संभाव्य त्वामतिभरक्ष
मस्कंधं सबांधवः॥ सहायमध्वरधुरां धर्मराजो विवक्षते॥१०३॥ १०३॥ १०३॥ ७॥ ॥

थमेनारिणा जातमजनि नपुंसके भावे क्तः॥१०२॥ अस्तु सोपि शत्रुः को दोषस्तत्राह संभाव्येति बंधुरेव बांधवः सधर्मराजः
अतिभरक्षमः स्कंधो यस्य तं तथा तं स्कंधमित्यर्थः त्वां सहायं संभाव्याभिसंधाय अध्वरस्य धुरं अध्वरधुरं ऋक्पूरित्यादिना
समासान्तो अप्रत्ययः समासान्तानां प्रकृतिलिंगत्वात् स्त्रीत्वे परवल्लिंगत्वेऽप्यधिवक्ष्यते वोढुमिच्छति वहतेः सनि ढत्वादि तेन सन्न
न्तात्तङ् तथापि विरोधो विभाषया भोवं दुग्धे इत्यस्यात्मनेपदविकल्पनात् विशेषणसामर्थ्यात्तत्र तत्र यागधुरः प्रतीतेः समासोक्तिः॥

भा॰टी॰द्वि
२७ रिपुनं॰

न्त इति ज्ञात्वा कस्मात्करोषि दोषः प्रागेव परिहार्यस्तत्को दोष इत्यत आह । महात्मन इति । महात्मानो निग्रहानुग्रहसमर्था भजमानान्
शरणागतान् अनुगृह्णन्ति । किमुत बंधूनिति भावः । अत्रार्थान्तरं न्यस्यति । सिंधवो महानद्यः समानः एकः पतिर्यासां ताः सपत्नीः
नित्यं सपत्न्यादिषु चेति ङीप् नकारश्च । नगनिम्नगाः गिरिनिर्झरान् सख्यं प्रापयन्ति । स्वसौभाग्यं नाद्यः प्रयच्छन्तीति भावः ॥१०४॥
नाहं संप्रत्युपेक्षैव पश्चात्सार्थनया पार्थनावर्जयेनेत्यत आह । चिरादिति । बलिनः स्वयं बलवतोप्यरिषु विषये बलात्कारो दण्डश्चिरा

महात्मानोनुगृह्णन्ति भजमानान्रिपूनपि ॥ सपत्नीः प्रापयंत्सख्यं सिंधवो नगनिम्नगाः ॥१०४॥
चिरादपि बलात्कारो बलिनः सिद्धयेऽरिषु ॥ छन्दानुवृत्ति दुःसाध्याः सुहृदो विमनीकृताः ॥१०५॥

श्चिरकालेनापि सद्यो माभूदिति भावः । सिद्धये वशार्थं दण्डः सिद्ध्यै भवतीति शेषः । अविमनसो विमनसः संपद्यमानाः ता विमनी
कृताः वैमनस्यं प्रापिता इत्यर्थः । अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्चेति च्विगतसकारस्य लोपः । अवर्णस्य ईत्वे ईकारः । शोभनहृदयेषां
ते सुहृदः । सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः । छन्दस्याभिप्रायस्यानुवृत्त्यानुरोधेनापि दुःसाध्याः आ
वर्जयितुमशक्या इत्यर्थः । अभिप्रायश्छन्द आशय इत्यमरः । शनैः शनैर्दण्डेनापि वश्यो भवति मित्रं वैमनस्येन तावन्नायातीति भा

रामः
२७

ननुसुहृत्कार्यात्स्वकार्यंबलीयइत्यतआह मन्यसइति· नाकिनांदेवानांप्रीतयेऽरिवधःश्रेयान्प्रशस्यतरः प्रशस्यस्यश्रइति
श्रादेशः इतिमन्यसेनन्वहं पुरोडाशभुजांहविर्भोजिनां अमरस्य· नाकिनांइष्टमभीष्टंकर्तुं ईष्टे· कर्मणिकः इष्टमिष्टिकर्त्ता
इतियावत् यजेर्भावेक्तिन्· वचिस्वपीत्यादिनासंप्रसारणम्· अलन्तरामतिपर्याप्तंस्यात्· अव्ययादामुप्रत्ययः· शत्रुवधादपि
प्रियकरोयागएवनाकिनांतुष्ट्यापिशत्रुवधस्यतत्करत्वादितिभावः॥१०६॥ तथाप्यमृताशिनांतेषांकिमेभिःपिष्टभ

मन्यसेऽरिवधःश्रेयान्प्रीतयेनाकिनामिति·॥ पुरोडाशभुजामिष्टमिष्टिकर्तुमलन्तराम्·॥१०६॥
अमृतंनामयत्सन्तोमन्त्रजिह्वेषुजुह्वति·॥ शोभैवमंदरक्षुब्धक्षुभिताम्भोधिवर्णना·॥१०७॥

क्षणागतोभूतैरित्यत आह· अमृतमिति· अमृतंनामसन्तोविद्वांसोमंत्राएवजिह्वायेषान्ते मंत्रजिह्वेष्वग्निषुमंत्रजिह्वः
सप्तजिह्वोहुतवहजिह्वोहव्यवाहनइतिवैजयन्ती· यत्पुरोडाशादिकंजुह्वति तदेवेतिशेषः· यत्तदोर्नित्यसंबंधात्· मन्दर
एवक्षुब्धोमंदरक्षुब्धः स्वान्तेत्यादिनामन्थार्थेनिपातनादिति क्षुब्धेनक्षुभितस्यमथितस्य स्वार्थेसेडेव· अंभोधेर्वर्णना
शोभैवालंकारएव अभिमंथनेनामृतमुत्पादितमितियत्कीर्तिमात्रं· अतोऽमृतमेवामृतमितिवाक्यार्थयोर्हेतुमद्भावात्

यात्राप्रतिबंधः कश्चिदन्तरस्तत्वाली स्यादन्तराल्ययति · प्रतीक्षाये पूज्याये · पूज्यप्रतीक्ष्यरस्मरः । पितृ घसे पितृभागिन्ये ·
विभाषास्वस्त्रपत्योः । इति विकल्पादलुगभावः · मातृपितृभ्यां स्वसा · इति षत्वम् · तेनवस्तुतोः शकुन्तलागाः पराधान् · आ
गो पराधो मन्तुश्चैत्र समरः । सहि ध्येय इति पत्वया गति भुजंगतिज्ञापितं तत्प्रतीक्ष्यं प्रतिपालनी यम् · अन्यथा ह्येतस्मर
णादिति भावः ॥ १०८ ॥ ततस्तमति प्रतिश्रुतं किं तस्यान्तरलाद्यै ह्लात्तदपि जिह्वासितमनन्तरमाह नीक्ष्णो नि · ततः तस्
त्वस्य शुद्धिलीक्ष्णान्निशी तास्मादिति विद्धिसध्याहारः । एवमुत्तरत्रापि · तथाप्यहं तु हतो सरस्तु दारास्वदन्तर्मं ऊ हितो न ·

ते·प्र·१

सहि ध्येयः शकुन्तलामागांसि स त्वो मे रजिय त्वया ॥ प्रतीक्ष्य तां प्रतीक्ष्या येपि न घसेत्प्रतिश्रुतम् ॥ १०८ ॥
६२ नीक्ष्णा नारं तु हद्बुधिः कर्मणां तं प्रतापवत् ॥ तोपतापि मनस्तोष्मवागे कावाग्मिनः सतः ॥ १०९ ॥

भवेत् · अहिंसैव परं पीडये दित्यर्थः · कर्मव्यापारः प्रतापवत् · तेजस्विभयदं स्यात्तथापि शान्तं स्यान्न तु हिंसावद्ध्यं भवती
त्यर्थः · मनश्चिन्तं तोष्म अभिमानोष्णं स्यात्तथापि उपतापयती त्युपतापि · अन्याः स्वित्परमं संतापि न स्यात् · वाग्मि
नो वक्तुः सतो वागेका एकरूपं स्यात् · वाग्मी सत्समेव वदेदित्यर्थः । अतः सत्यसंधस्य प्रतिश्रुतार्थहानिरनर्हेति भावः ·
अत्र प्रकृतायावास्तो प्रकृतानां बुद्धिकर्ममनसां वन्तुल्यधर्मा दीपयन्या वगमाद्दीपकालंकारः प्रकृताप्रकृतानां तु स

अद्य मम्चाकाले येवबधइत्साह स्वयमिति । किंच । अह्नोभानुमानिव स्वयंकृतः प्रसादोऽनुग्रहः प्रकाशश्च यस्य तस्य चैव स्यान्ता
यसमयावधिं नियतकालावसानमप्राप्य भवानपि नालं शक्तो न तथा चैतथा समोपकीर्णस्य शोभाभ्यामन्यत्र किंचित्फलं स्यादि
किन्तु·२ तिभावः ॥११०॥ नहि किमसन्तोपदेश्यैवने साह । ह्लेति । कृसविदः कार्यज्ञा विधिज्ञास्य प्रणिधीयन्त इति प्रणिधयो गूढचारिणः प्र
णिधिशब्दपुरुषइति हलायुधः । तरन्त्येभिरिति तीर्थानीमंत्राद्यष्टादशस्थानानि जलावतारेष्वयोनो जलावतारे च मंत्राद्यष्टादशस्त

स्वयं कृतप्रशादस्य तस्याह्नो भानुमानिव । समयावधिमप्राप्य नांतायालं भवानपि ॥११०॥
फलाकृसविदस्तीर्थेष्वन्तः प्रणिधयः पदम् । विशंकुर्वन्तु महतस्तलं विद्विषदम्भसः ॥१११॥

विपुराणपक्षे ते तथापात्रे तीर्थस्यादिति हलायुधः । ते यन्तः पदस्थानं पादप्रक्षेपं चलत्वामहतो दूरावगाहस्य प्रत्यस्य चाविहितनः ।
शत्रुरेवांभस्तस्य तलं स्वरूपमयाणामिति यावत् । अथः स्वरूपयोरश्लीलमिस्यमरः । विशंकुर्वन्तु विदन्तु । विद ज्ञाने लोट् । विशं
कुर्वन्तित्यन्यतस्याभिनिविकल्पाद्दाम्यसयोनिपातः । अम्भसः शत्रोः कृतनीर्थस्य समप्रदेशालासागन्तः प्रविश्यपरीक्षालिस
र्थः । श्लिष्टपरंपरितरूपालङ्कारः ॥१११॥ ११२॥ ६७

आवश्यकं वैनदिसाद् अनुदिति। उत्सूत्रउक्तास्त्री नीतिशास्त्रविरुद्धः पदन्यासः एकपदप्रक्षेपो यो पीतियावत् स नास्ति यस्याः सा
नीतिपूर्वकसर्वव्यवहारे सेत्यर्थः। अन्यत्र अनुत्सूत्रपदन्यासो ऽनुद्धितसूत्राक्षरकृच्छ्रूपसंख्यानं निरपेक्षेण तत्राक्षरेणैव सर्वार्थ
प्रतिपादको न्यासो वृत्तिव्याख्यानग्रन्थविशेषो यस्यां सा तथोक्ता सती यथार्थकल्पना या शोभना वृत्तिर्भृत्सामासादि
जीविका यस्यां सा तथोक्ता। अन्यत्र सती वृत्तिः काशिकाख्यः सूत्रव्याख्यानग्रन्थविशेषो यस्यां सा। वृत्तिर्ग्रन्थाजराजीवनयो रिति
वैजयन्ती। सन्निनिबंधनानि अनुजीव्याधीनांक्रियावसानेषु दत्तानि गोणीपुरणादिशास्त्रानिकपारितोषिकदानानि यस्यां

अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबंधना। शब्दविद्येव नो भाति राजनीतिरपस्पशा॥११२॥

सा। एतत्त्रयं शब्दविद्यायामपि नितिनिबंधं वेसेनकृत्वन व्याख्याने मिताक्षरायां द्रष्टव्यम्। अन्यत्र सन्निबन्धनं भाष्यग्रन्थो यस्यां सा। एवंभू
तापि राजनीति राजवृत्तिरपगतः स्पशश्चारो यस्याः सा अपस्पशा चेत् यथार्थवर्णमंत्रज्ञः स्पशो हेरकः इति हलायुधः। अ
न्यत्राविद्यमानः पस्पशः शास्त्रारंभसमर्थ उपोद्घातग्रन्थसंक्षेपको ग्रन्थो यस्याः सा। अपस्पशा शब्दविद्या व्याकरणविद्येव सा
नो भाति न शोभते। तस्मात् चारप्रेषणमावश्यकं न तु हितस्य राज्ञो ऽन्यथा आयत्ताद् इति भावः। अत्र अपस्पसेनेजनुक्तायवस्तुक्रियो रे

रामः
२९

नच केवलं चारमुखेन कृत्यात्कृत्यज्ञानमपि तु उपजापश्च कर्त्तव्य इत्याह अज्ञानेति । किंच अज्ञानदोषैः परैरज्ञातस्वमर्मभिः दोषज्ञैः
स्वपरमर्मज्ञैः अभिव्यक्तानि भेद्यस्याग्रे प्रकटितानि शासनानि तत्स्वामिसाधनाभ्यासकराणि कूटलिखितानि येषां तैः भयवेतनैः
भयमत्र भेद्यस्वामिनि वेतनं भृतिर्येषां तैः उभयजीविकाग्राहिभिर्भेद्यनगरवास्तव्यैश्चरैरिस... भृतपोषणेवेतनामिसमाः शत्रोः
संबंधिनः समवायं समवयन्तीति सामवायिकाः संघमुख्याः सचिवाद्याः समवायात्समवैतीति ठक् दूष्याद्विधा मे तेषु हत्वा अस्मा

अज्ञानदोषैर्दोषज्ञैर्दूष्यो भयवेतनैः । भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः ॥ ११३ ॥ उपेयि
वांसि कर्तारः पुरीमाजानशात्रवीम् । राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव ॥ ११४ ॥ ११४ ॥

भिरेषां शिक्षितान्येवं ग्रहीतानीत्युक्त्वैर्दूषयित्वा भेद्या विघटनीयाः ॥ ११३ ॥ उपेयिवांसीति । किंच उपायज्ञैः कार्यसाधनकुश
लैस्तव चरैरितीति चरैर्गूढचारिभिः पन्थानम् एकार्थानि तुल्यार्थानि एकप्रयोजनानि राजन्यानां समूहो राजन्यकानि गोत्रोक्षोष्ट्रोर
भ्रराजेत्यादिना वुञ् अजानतः शत्रोः इमामाजानशात्रवीं पुरीमिन्द्रप्रस्थमुपेयिवांसि प्राप्तवन्ति उपेयिवाननाश्वाननूचानश्चेति
क्वसुप्रत्ययान्तो निपातः कर्तारः करिष्यन्ते कृत्यं कर्मणि लुट् इन्द्रप्रस्थे अस्माकं मद्राजकार्यं भवति तदप्यस्या आपाने न सन्देहः

नतुनगाध्वरकर्मणि कौ पुष्कवकाशइत्याशंक्य न त्वेवमहत्केहवीजं संपादयन्ति· सविशेषामिति· पाण्डोः सुते युधिष्ठिरे भवति
पूज्यत्वामिसविशेषं यथा तथा भक्तिं नन्वति सति नरलाश्चापलाम सत्सरिणो द्वेषवन्तः परे शत्रवः स्वयमेव वैरायितारो वैरंक
र्तारः शब्दवैरकलहाभ्रकाण्वमेघेभ्यः करणे निक्य पूतानः कर्तरि लृट्॥ ११५॥ किं तेनैः सर्वैर्वैरायितव्यं तेनेत्याह· यदीति द्वह
विपक्षमध्ये शत्रुमध्ये सहसंवृद्धपुञ्जोपि भोगेन सह स्वैर्यं गतापि· सत्सूद्विषेत्यादिनाक्विप् पू येभ्रभुजो राजानः आत्म

सविशेषं सुते पाण्डोर्भक्तिं त्वयि बिभ्रति॥ वैरायितारस्तरलाः स्वयं मत्सरिणः परे॥ ११५॥ परहास्य
विदोविपक्षमध्ये सहसंवृद्धपुजोपि भूभुजः स्युः॥ बलिपुष्टकुलादिवान्यपुष्टैः पृथगस्मादविरोध
भाविनामैः॥ ११६॥

विदः स्वाभिजनविदनः स्युः पक्षः स्वात्मस्वरूपयोर्दिनः स्युस्ते भूभुजः भिर्बलिपुष्टकुलात्काककुलात् काकेनुकरटारिष्टबलि
पुष्टसकृत्प्रजाइत्यमरः अन्यपुष्टैः परभृतैः कोकिलैः रिवारेरासस्थो ऽस्माद्विपक्षमध्यात् अन्यत्वादिसत्रान्यशब्दस्यार्थपरत्वात्स्पृथ
गादिसयोगेपिपंचमी· पृथग्भाविनः पृथक्भवने भविष्यन्ते भावे लुट्· विरदादितिशत्रेनेषपिकेचिदस्माभिः संगच्छन्ताइत्यर्थः·

अथफलितंनिगमयन्नाशिषंप्रयुंक्ते॥सहजेति॥सहजंस्वाभाविकंचपलंदुर्विनीतत्वमनवस्थितत्वंचचपलंपारदेशीप्रेङ्खु
दुर्विनीतेनवस्थितमितिवैजयन्ती॥तेनैवदोषेणसमुद्धतोदृप्तः॥पक्षसहायोगरुत्पक्षः॥साध्यगरुत्सार्ध्यंसहायबलमितिवि
तिवैजयन्ती॥चलितोअस्थिरोदुर्बलपक्षपरिग्रहोयस्यसन्यससहरूपः॥शत्रुवर्गः॥दुःखेनआसाद्यतेगम्यतेइतिदुरासदः॥दुरासू
मा·वि·५ र्वात्तर्दः॥खलु॥नस्वेववीर्येचनेऽस्मिन्॥नवदुरासदवीर्यभावसौ॥वीर्यंशुक्रेप्रभावेचतेजःसामर्थ्ययोरपि॥इतिवैजयन्ती॥विभावसुरि

सहजचापलदोषसमुद्धतश्चलितदुर्बलपक्षपरिग्रहः॥तवदुरासदवीर्यविभावसौशलभतांलभ
तामसुहृद्गणः॥११७॥इतिविशदकलितार्थमौद्धवीयंवचस्तन्नजगतनयमार्गामार्गलांदुर्नयस्य॥
नरकरिपुरुदस्थादुच्चकैस्तद्विनोरस्थलनियतनिषणाभिमुक्तांशुभ्रुवान्तः॥११८॥ ११९॥ छ॥
इतिशिशुपालवधेमहाकाव्येश्रीअंकेमाघकृतौमन्त्रविचारोनामद्वितीयस्सर्गः॥ ॥शुभमस्तु॥

तिविभावसरौ॥शलभतांपतङ्गत्वंसमीपतङ्गःशलभाविसमरः॥शलभतांगच्छतु॥रूपकालंकारः॥दुतविलंबि
तंवृत्तम्॥११७॥इतीति॥सहरिरितीत्थंविशदकलितार्थौविवेचितार्थंमिनुगतनयमार्गानीतिमार्गानुसारिणीं॥

दुर्नयस्य बलभद्रोद्धतस्येति भावः अर्गलां निवारयित्री। मितिर्वै धर्मे शास्त्ररूपकालं कारः नहि ष्कं भेर्गत्वं ननोपमरः
अनस्य जानिनमु दृंरः कनोनं रांउ छिन्ने उन्नतेउरस्थले नियत निषसृयानि सविश्रान्तया श्रियाश्रुतानान्ये
नैतिमंत्रगुप्तिः। उद्धवस्य मामो दृवीमेनां पूर्वोक्तां वाचं श्रुतवान् भाषायां सद्धवस्तुवरति क्रतुगत्ययः। उद्धरे वोद्ध
कं उन्नतः सन् अव्ययसर्वनाम्नामकच् प्राक्टेरिति अकच्प्रत्ययः। उदस्थात् आसनादुत्थितवान् उदोनूर्ध्वकर्मे
णीत्यस्य प्रत्युदाहरणमेतत्। श्लेषरूपकानुप्रासालङ्कारौ· मालिनीवृत्तम्॥११८॥११८॥ ॥इतिश्री
पदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषा
ख्ये द्वितीयस्सर्गस्समाप्तः॥ ॥लेखकपाठकयोः शुभमस्तु॥ ॥परमगुरुभ्यो नमः॥ ॥
श्रीगणपतये नमः॥ श्रीसरस्वत्यै नमः॥ श्रीविश्वेश्वराय नमः॥ श्रीजाह्नव्यै नमः॥ ॥शुभमस्तु॥
द्वितीयस्सर्गस्समाप्तः॥

षष्ठसर्गः प्रारंभः ग्रन्थसंख्या·
देवदत्तीयम् शुभमस्तु

ष॰

मा॰टी॰६ श्रीगणेशायनमः॥ षष्ठेऽत्रानुवर्णनं प्रस्तौति कविः। अथेति। अथ सेनानिवेशानन्तरं। गिरौ रैवतके रिरंसुं रन्तुमिच्छुं।
एनं सन्तं तदुप्रस्थ एतेनं अनुवर्णनप्रवृत्ते। प्रमुदितं दृष्ट्वा तानसर्वैककालमुक्तं। समांसाधूनां विपदं तं करोतीति
१ म॰२ विपदं कृतन् किंपितुगागमः तं विपदं तं कृतं से अभिनिभाव। अमुं हरिं निषेवितुं ऋतूनां ऋतूनियतं दृष्ट्वा। अनतिक्र
म्य यथा ऋतूनां यथाऽर्थे व्ययीभाव। यथा ऋतूनां स्थितानां प्रसवश्रीः पुष्पफलसंपत्तिः यथा ऋतूनां प्रसवश्रीः।

अथ रिरंसुममुं युगपद्रिरौ कृतयथास्वतनाप्रसवश्रिया॥ अनुगुणं तनिषेवितुमादधे भुवि पदं विपदं तं कृतं सताम्॥ १

प्रसवस्तु फले पुष्पे रलमः। शाकपार्थिवादिषु द्रष्टव्यः। सा कृता येन कृतयथा ऋतूनां प्रसवश्रि
या। [redacted] यथा ऋतूनां प्रसवश्रिये सर्व अनुगुणेन युगपत्भुवि पदमादधे। आहितं। युगपद्वनुगुण
प्रादुरभूदित्सर्थः। न ह्यवरं सेवकाः क्षिपतीति भावः। अत्र सर्गे सर्वत्र यमकं। शब्दालंकारः। तल्लक्षणं तत्कृंच तुर्थे। एष॰
अर्थालंकारस्तु यथासंभवमूह्यः। अस्मिन् सर्गे द्रुतविलंबितं वृत्तं। द्रुतविलंबितमाह। ततो भरौ विरिलक्षणात्॥ १ १

अयं लोकवेद्ययोः प्राधान्येनाव्यवहारात्तु संततमारोदयोरपि इति· वनेति· [redacted] सहरिः पुरोऽग्रेप्रथमं वा नवपलाशानि नूतनपल्लवानि पलाशवनानि किंशुककाननानि यस्मिंस्तन्नवपलाशपलाशवनं· बहुपूर्वपदो बहुव्रीहिः पलाशः किंशुके पत्रे पलाशस्तु मिति विश्वः। स्फुटानि विकचानि परागैः रजोभिः परागतानि आप्तानि च पंकजानि यस्मिंस्तं स्फुटपरागपरागतपंकजं

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपंकजं

मृदुलतांतलतांतमलोकयत्ससुरभिंसुरभिंसुमनोभरैः २

अं मृदुलाः कोमलाश्च ते तांताः आतपसमये किंचिन्म्लानाः लतांताः पल्लवा यस्मिंस्तं। मृदुलतांतलतांतं। सुमनोभरैः पुष्पसमूहैः सुरभिं वसन्तमद्रलोकयत् पश्यत्· सुरभिश्चंपके स्वर्णे जातीफलवसंतयोः सुगंधो च मनोज्ञे च वाच्यवदिति विश्वः। इह प्रतिपादं प्रथमाद्वितीयाक्षरयोः परतोक्षरत्रयावृत्तिरूपयमकं प्रक्रमात्तुर्यपादे पितद्वयकमेकस्मादपि अपराभिन्नासजाती

घ
मा॰टी॰६ विलुलेति। विलुलितालकसंहतिर्विधूतचिकुरनिकरः सन्। मृगदृशां ललाटजं श्रमवारि स्वेदमाम्रष्टान्म्रपजन्मं
दरतिभावः सरसां तमुतरंगततीः दलंती विकसंति कुवलयानि यस्मिं कर्मणि तद्यथा तथा वलयन्पुनिलरति भावः। म चालयन्नित्यर्थः २
२ आ॰३ रुत्वा पुराववौ वातिस्म। २ तुलयतीति कुरवकेभ्य निबंगि गिरिलग्ना। अतएव गुणवतः भुक्तगुणाकस्य कुरव

विलुलितालकसंहतिरामृशन्मृगदृशां श्रमवारि ललाटजं तनुतरंगततीं सरसां दलत्कुवलयं व
लयन्मरुदाववौ २ तुलयतिस्म विलोचनतारकाः कुरवकस्तवकव्यतिषंगिणि गुणवदाश्रयल
ब्धगुणोदये मलिनिमाधवयोषितां ४
कस्याश्रयेणाश्रयणेनलब्धोगुणोदयोगुणोत्कर्षोयेनतस्मिं लिनिमा॰स्त्र
धवलेनीलस्य स्फुरणादिति भावः। अलिनिषंगे मलिनस्य भावो मलिनिमा। निजनीलिमामाधवयोषितां हरिवधू सप॰
णां विलोचनानां तारकाः तारका क्षिणकनीनिके स्यमरः तुलयतिस्म समीचकार। नहूधाविस्वर्धः। तुलाशब्दस्य दृशापर्याया २
त्करोतिणपंताद्धट्। स्परतिभूतेलट् उपमालंकारः॥ ४ २॥

स्फुटमिति उज्वलकांचनकांतिभिः मृदुस्वर्णप्रभैः चंपकैर्युतं। चंपकसमूहमध्यगतमित्यर्थः। स्फुटं विकसं
न्नशोकपुष्पंमिर्ह्यभेदः विप्रिदाडिम्योटूनां विभर्तियत्नस्यभिदाभृतो पि तस्य विरहिणां हृदयस्य पिंडस्य संबंधिमदना
ग्निना कपिशितं पिशितं मांसमिवाशोभत रत्युत्प्रेक्षा ५ स्मरेति। आम्रवणस्य चूतवनस्य। आम्रश्चूतो रसालस्त्रे

स्फुटमिवोज्वलकांचनकांतिभिर्युतमशोकमशोभतचंपकैः। विरहिणां हृदयस्य भिदाभृतः कपिशितं पिशि
तं मदनाग्निना ५ स्मरहुताशनमुर्मुरचूर्णतां दधुरिवाम्रवणस्य रजःकणाः। निपतिताः परितः पथिकव्रजानुपरि ते (परितेपुरतोभ्रमं)

त्यभरः। प्रनिरंतरः शारिसारिन्नावनतकारस्यणत्वा रजःकणाः पराग चूर्णाः स्मरहुताशनः का
माग्निः तस्य मुर्मुरः। मुर्मुरस्तु तुषानलः इति वैजयंती। तस्य चूर्णतां दधुरिवेत्युत्प्रेक्षा। अतएव मुर्मुरचूर्णत्वादेव परीतः प
रितो निपतिताः ते रजःकणाः पंथानं गच्छतीति पथिकाः। पथः कन्निति कन्प्रत्ययः। तेषां व्रजान् समूहान् परितः पुरः परितापयामासुः अ
तो मुर्मुरचूर्णोत्प्रेक्षणमिति भावः ६ ॥

मा० टी० ष० रतिपतीति। प्रियतमेषु विषयेकृतक्रुधः। कृतरुषः। प्रतिघारुट्क्रुधौ स्त्रियामित्यमरः। वधूजनानापिका कुपिता स्त्रीरत्नेष्वन्तीनु
भएवुलोक्रियायामितिध्वविष्वदर्थेएवुसमयः। अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीनिषेधाद्वधूरिति द्वितीया।
३ रतिपतिना कामेन प्रहिता प्रेरितेव। तद्बाणिश्रवणानन्तरं एव तासां कोपत्यागदर्शनादियमुत्प्रेक्षा। वकुलपुष्पा
संगरसो मकरंदः स एवासवस्तेन मत्तामेनयेचालध्वनिमधुरस्वरा मधुपावलीकर्त्री निगच्छतीसंगताहृष्ट्वान्ति

रतिपतिप्रहितेव कृतक्रुधः प्रियतमेषु वधूजनानापिका। वकुलपुष्परसासवपेशलध्वनिरगान्निरगान्म
धुपावलिः ७ प्रियसखीसदृशं प्रतिबोधिताः किमपि कामिजनाः परपुष्टया। प्रियतमाय वपुर्गुरुमत्सरच्छि
दुरया दुरयाचितमंगनाः ८
६४ रगान्निर्गता। गमोगान्लुङि गादेशः ७ प्रियसखीति गुरोर्महतो मत्सरस्य ईर्ष्याहेतुभूतस्य। छिदु
रया छन्ना। छिदिभिदिच्छिदे: कुरच्। काम्यगीर्याहावाचा। परपुष्टया कोकिलया प्रियसख्या: सदृशं यथा तथा किमपि दुर्वो
धं रहस्यहितं प्रतिबोधिताः प्रियतमायाः प्राचितमप्रार्थितमेव वपुर्निजांगं अदुः। अर्पयामासुः। ददातेर्लुङि गातिस्थेत्यादि
नासिचो लुक्। कोकिलाकूजितश्रवणानन्तरमेवांगनार्पणादेतस्य हेतुकाघनंतरमपायेन तथा किमपि बोधितास्स्मुत्प्रेक्षेते ८

रामः
३

मधुकरैरिति मधुकरैः कर्तृभिः । अपवादस्यगवचनापि । यद्वंटादिकुत्सितवाक्यं कुर्वन्ति । रपवादकरा आघ्रातेरिव । पथि
काहरिणाइवापरिवादिनीस्वरजितावीणाविशेषध्वनिजयिन्या । समभिः परिवादिनीस्वरः जेः क्षिपितुकः वचसो गी
तस्य कलतया माधुर्येण करणेन रजिता रंजिता अनाकृष्टाः सन्तः स्मरस्य वशं एजे राज्ञोनाम कामी भोस्तुः । रजेरोमस्यगम

मधुकरैरपवादकरैरिव स्मृतिभुवः पथिका हरिणा इव
कलतया वचसः परिवादिनीस्वरजिता रजिता वशमापयुः ९

णस्य उपधाभकारलोपः । इहोपमानस्य गसादृश्यपादेपरिकं पमस्य गत्वामुपमेयेषु पथिकेष्वस्तीति अविरोधः । स्मृतिभवः
स्मरस्य स्मगपानचिंताविषयत्वामस्य गत्वहरणागर्न्दे शस्य वशमायपुः । यथाव्याधगानागस्य गर्न्ने मृगाः पतन्ति ।
तद्वन्मधुकरहुंकाराकृष्टाः पथिकाः स्मरपारवश्यं भेजुरित्यर्थः । एकेवोपमेयं ९ ॥ ॥

समभिसत्येति। भ्रमद्याकर्त्री। कुसुमालामव विचीषया। अविवेतुंकर्त्तुं मिच्छया। रिरंसयेति भावः। विनोतेः सन्नन्तादुपसर्गादिति स्त्रिया मा
मा०टी६ कारमत्यः। विभाषावेरिति विकल्पात्कल्लाभावः। रसात्समभिसत्यस्य समागस्य। अवलंविते नहस्तेनगृहीतः। तथाप्युक्तिनमवंशमगच्छ
४ त्। अतएवहृष्योत्सुकैर्वर्णमुन्नतोवनपादपः। नतुनागरिकमिति भावः। नक्तते स्पन्दतात्र सत्यतया। अन्तयाऽनुभावोनतात्तयान्
नयापुंस्त्वेनतराजा। स्युः पुमांसः पंचजनाः पुरुषाः पूरुषानराः स्वपरः। यः कांताकरगृहीतीन एवरति नपुंसक एव लौकिके पुंप

समभिसत्य रसाद्वलं वितः भ्रमद्या कुसुमाव विचीषया। अविनमन्नराजहृष्योत्सुकैरन्तया न्तया [redacted] वन
पादपः १० रसमपास्य विरागि पराग्णि गौरिलिकदंवकमंबुरुहां ततीः। स्तन भरेण जितस्तवकानमन्नवलनेवलनेभिमुखं तव ११

स्तोपदे शोपि व्येवेति भावः १० अयक श्चित्सपंग्रहाप्रोबन्स्वार्थ प्रियाम लिपातेन भीषयन्त्रिपिः कुलकेनाह। रसमित्यादि। स्तन
भरेणासाधनेञ्जिताप्यांस्तवकाप्योपनमंतीमवलतापयासात्पोक्ता। नस्या। संवुद्धि। जितस्तवकानमंनूनवलने। स्तवकानमन्नवत्तोपमे
स्पर्शः। अतएवेन्दुं विरागि विरक्तिमत्। अलिकदंवकं पराग्णिणोः परागवती रिति अतिहेतूक्तिः अम्बुरुहां ततीरपास्य। त
वाभिमुखंवलने चलति विशिष्टलताभ्रमादिति भावः तथाच भ्रान्तिमदलंकारो व्यज्यते ११ २ १२ एषः
४

रा

अथात्मेलदाभिमुखागमनेकारणमाह। सुरभिमिलीति। नवसुरभिणिश्वसितेनिश्वासमात्रेणनवसुधावन्मधुरे। अधरेचत्त्वं
तस्मादधरोदधानस्यात्रेभ्रमरस्य ममैवाभूपलभ्यमानोस्तुपनसंपुष्पाणांसंबंधिनोसोयनसोगंधासो। सोरभमाधुर्यमन
६३ सौत: कारणस्यमुद्देनालंनपर्याप्तो। अलसत्दैनारसगंधलोभाद्गच्छतीसर्व॥ नमःस्वस्तीस्यादिनाचतुर्थी। अत्रकांता
कर्तृकस्वपंग्रहाश्लेषसखार्थिन: प्रियस्यतद्रूपहेतोरेवागमनहेतुत्वेनात्मदृष्टांतेनसखसोरभलोभरवेराग्यमोर्वर्णितिपितु

सुरभिणिश्वसितेदधतत्तंबंनवसुधामधुरेत्नवाधरे॥
अलमलेरिवगंधरसावमूममनसोमनसोमनसोमुदे १२

सोविस्मायमकानुसारेणविप्रकृष्टेनापिममपदेनशब्दस्मात्वयः। वत्सनेभिमुखंतवन्यतिभयादिवसस्वजरनिउपक्रमो
पसंहारआमले। ?प्रकृतत्वेनोपमेयत्वावगमात् अन्यथामध्येनहेतूपरीत्येनहिएधादिमलमहिवात्तस्मोध्वगम
नेनअश्रीपमानुप्रायसयमकानामभावाद्विजातीयानांसंसृष्टिः स्पष्टेव: नयायमकानांचत्रयाणांचतुर्थपादस्
दोवेकस्मादसराहूयांन्निभिश्चपरतोसरत्रयाहृतिलक्षणानांभिन्नत्वात्सजातिसंसृष्टिश्चेष्टा। १२

रतीति रतीत्यंगदंतं प्रणयिनं अनंतरं भुजयोर्बन्धनेन उच्चतया वसुजमोजमोयस्याः स्वांगा ञ्चोपसर्जमादिति ङीष् वलि
मा०टी०६ भयावलयोर्वलिभस्या। तुंदिवलिवटेर्भ इति प्रत्ययः उदरश्रिया मध्यगतो भयाउपलक्षिता। अंगना। अलिभया दिवरंभ
सा त्सस्वजे। आलिलिंग। वलनुत्तत्युणगादेवेति भावः। ध्वजपरिष्वंगेरिति धातोः कर्त्तरि लिट्। लज्जामन्मथमाध्यस्थ्यात्म
५ ध्येयं तापिकायता १२ वदनेति। वदनस्य सौरभे सौगंधे लोभेन भ्रमतामभ्रमरोणा हेतुना यः संभ्रमस्तेन संभ्रमयोभयासंपादि

रतिगदं तमनंतरमंगनाभुजयुगोन्नमनोच्चतरस्तनी प्रणयिनं रभसादुदरश्रियावलिभयालिभयाद्विससस्वजे १३
म०म्र० वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया चलितयाविदधेकलमेखलाकलकलोलकलोलदृशान्यया १४

तश्रिया चलितया। अलिसंभ्रमात्। प्रस्थितया। अतएव लकेरलकपातेर्लोलदृशा चंचलाक्ष्या अन्यया स्त्रीतरेण। कलमे
खलायाः कलकलः कोलाहलो विदधे। विहितः। अलिभयाद्परा। स्याः कांचीगुणध्वनिरजनीत्यर्थः। एतेन चकितमुक्तं।
चकितं भयसंभ्रमः। अनुप्रासयमकयोः सजातीयशब्दालंकारयोः संसृष्टिः स्पष्टेव। तथा यमकयोश्च द्वयोश्च द्वयोः एम्
सजातीययोश्चतुर्थपादा [illegible] वेकस्माद्क्षरान्द्वाभ्यां परतोक्षरत्रयाद्भिन्नलक्षणयोः स्थितयोर्म्यसजातीययोः संसृष्टिः १५ ५

नां॰

ज॰२ अँगणान्निति। याः कुकुरस्त्रियः यादवाङ्गणशोव हृश ः वकल्पार्थाच्छस्काएकादिनिशास्त्रसयः। प्राणानमपिप्रि
यं। ज्ञानावेकवचनं प्रियान्नित्यर्थः। अभिमानिनीनांभावोभिमानिता। त्वन्तलोर्गुणवचनस्यपुंवद्भावोवक्तव्यः। मा
जगणान्नगणायंतिस्म। गणोश्रोणादिकाम्योवृद्धि। रैंचगणारनिशाभ्यासस्यपाक्षिकमीत्वं। ताः कुकुरस्त्रियोस्य धो
वसंतेसन्निप्रवर्त्तमानेसति। मधुश्चैत्रवसंतेचेतिविश्वः मदनव्यथयाविधुरितावि क्लिताः सत्यः धुरिन्न

अजगणान्नाणेघः प्रियमस्त्रनः प्राणान् मप्यभिमानितयानयाः सतिमधाव् भवन्मदनव्यथ्याविधुरि
ताधुरिताकुकुरस्त्रियः १५ कुसुमकार्मुककार्मुकसंहितद्रुतशिलीमुखखंडितविग्रहाः मरणमप्यपराः प्र
श्रेऽभवन्नवर्त्तत। स्वयमेवपुरः मदनारसर्थः १५ कुसुमेति। गते तिपेदिरेकिमुमुहुर्मुमुहुर्गतभर्त्तकाः १६
भर्त्तकाः। वियोगिन्यः नद्यतश्चेतिकप्। अपराः काश्चिदंगनाः कुसुमकार्मुकस्यकामस्यसंहितेर्जवनैः शिलीमुखैः
शरैः खंडितविग्रहाः पातितशरीराः सत्योमरणमपिप्रपेदिरे। पुनः पुनर्मुमुहुर्मूर्छुरितिकिमुवक्तव्यमित्यर्थः १६
र्मु

अथ कस्माच्छिरतोषितभर्तृकायावधुजनमाधाप्सनंत्रिभिः कुलकेनाह। सत्त्वेदिवेति। हेसखितनुभ्रूभांति। अस्यार्थ
मा० टी६ नघोर्ह्रस्वः। दीर्घान्नोत्तरपदयोर्वहुव्रीहिः। अन्यथा गुणः स्यात् हृद्दिशारोदनेछा अश्रुविमोचनमि
६ सर्थः हृदः सन्नंतादुप्रत्ययेटाप् तेन व वदनांभोरुहश्रियो ऽलंकरणाय सत्त्वं। रम्याणां विकृतिरपिश्रि

॥४॥ हृद्दिशावदनांबुरुहश्रियः सममनुसममलंकरणायते॥
तदपि संप्रति सन्निहिते मधावधिगमं धिगमंगलमक्षराः ९७

येमनोमीतिभावः। गम्यमानक्रियापेक्षयाचतुर्थी तदापि तस्यापि संप्रति मधौ वसंते सन्निहिते सत्त्व
देसति अश्रुणो ऽधिगमं प्राप्तं अमंगलं धिक् निंद्यमित्यर्थः धिक् निर्भर्त्सननिंदयोरित्यमरः धि ख:
गुपर्यादिषु त्रिष्विति द्वितीया अतोमाहरस्यर्थः ९७
६

त्यजतीति प्रियतयारहस्तया अघसंकिभिरनर्थेभ्यो स्त्रीभिः प्रेमपश्यन्तिभयान्यपदेश्या इति भावः। बांध
वैस्त्वपि विप्रयोगद्दिता उद्धारिताः कष्टमसौ अबला। विरहवेदनया। अचिराद्सून्प्राणान्त्यजति सम्प्र
ति वर्त्तमानसामीप्ये लडिति एवंविधा गिरः उक्ताः। हे सखि। विगतं तथ्यात्वं प्रापिताः। वितथ्या अनृताः।

त्यजति कष्टमसावचिराद्सून्विरहवेदनयेत्यघसंकिभिः
प्रियतया गदितास्त्वपि बांधवैरवितथ्या वितथ्याः सखि मा गिरः १८

वितथ्यं तथ्यत्वं यस्य ताः बहुव्रीहौ विशेष्यलिंगता ब्राह्मणादित्वात् ष्यञ्। ततो नञ्समासः। अतथ्याः स
त्याः। मा वितथ्याः माभूवन् भूयादिति शेषः। केनमा माङ्योगे लुङ्। सर्वे। विपूर्वात्तनोतेर्लुङ्। सिच् आस्। तना दिभ्यस्तथासोरिति
विभाषया सिचो लुक्। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। नमाङ् योगेऽडाटः प्रतिषेधः १८

नेति किंच असौ नेपथ्यगणाघीवहूरगतोऽहारस्थोऽपि महं वसंतोत्सवं महउद्धव उत्सवरसमय:।
मा०टी०८ नातिवर्त्तनेना निक्रमरनिवंधुत्तयावंधुसम्भूहेन। आमजनवंधुसहायेप्यसत्तल्लूतिनिलमसप:।
७

